दमेकशक्त्योभयबोधं नयतु शक्त्यनुसंधाने नोभयबोधं जनयतीति मिश्राशयः। किं तूभयबोधं
जनयतीति। तस्य चाशक्त्यान्वयबोधेनाप्युपपत्तेः न च ताहशनियमे मानाभावः। घटादिवृत्ति
चैकघटपदोपस्थाप्यघटद्वयेऽपि त्वान्वयबोधसंभवेनैकशेषानुशासनवैयर्थ्यापत्तेः न तु श
क्ताहीति मुत्तत्तो सक्तत्वं नार्थविशेषणां जातिविशिष्टव्यक्तिबोधानापत्तेः। न हि शक्त्यो घटं पदं
जानातीत्याहावाहत्या बोधस्यानुपपत्तात्। अतोऽपि विशेषेपि न सक्तत्वमिति चेत्तात्
संकेतानुसंधानमेकविधेयावच्छिन्नमेव स्वार्थीहे श्यकः पदबोधं जनयति एकोद्देश्या
वच्छिन्नमेवस्वविधेयक बोधं जनयतीति व्याप्तिः इयांगिकारस्तेन घटं जानातीत्यत्र नेका
कारस्थालीपचतीत्याहो च नाहत्तिविनाबोधः न च सैधववान द्रव्यमिव्याप्रित्याहितेः
लवणातुरगवद्देशोद्देश्यकद्रव्यबोधापत्तिरितिवाच्यं। वृत्तिविशेष्यमेवानुभाव्यमे
तियमस्यायोस्वीकारादतएव न स्वरूपाणामेकशेषवैयर्थ्यं। न च मगोगच्छतीत्या

सा:

दो सामान्यविशेषोभयशक्तमगयपदात्मसुत्वमगत्वोभयरूपेणाग्रकविशेष्यक बोधापत्ते
रिति वाच्यं। वृत्तिविशुष्यतावच्छेदकमेकमेवानुभावयतीति नियमांतरस्याभ्यंगिकारात
त्र तुरीयनियमे चैवं तत्तियवारशोतदे यथ्थामितिकाश्चित। नचैकमेव शाब्दबोधं जनय
तीति नियमांतरं प्रमाणाभावात। नच श्वेतो धावतीत्यादिशब्द श्लेषेपदमेदाहत्ते नस्या
त। इष्टापत्तेः। अत्र पुष्पवंतपदमेदोन्निवेशयोवाष्ये तेन तत्रन व्यभिचार॥ ननु पुष्पवंत
पदस्येंदुसूर्यैवृत्तित्वेहित्वं शक्यतावच्छेदकं॥ चंद्रः सूर्यश्चेतिप्रत्ययात। नच पुष्पवंतपद
केवलंचेंद्रसूर्ययोर्बोधमात्रोरिति वाच्यं पुष्पवंतपदं चंद्रे सूर्ये च शक्तमितिज्ञानात
केवलं चंद्रबोधइतिप्रांचवस्तुआहतत्स्वीकारेपि चैत्रो गच्छतइत्यत्रोद्दित्वसंख्यायाश्चैत्र
योत्तस्योरूद्देश्यतयाबोधोनस्यात अतएव एकपदेतोद्देश्यविधेयभावइत्युक्ते
पिनविस्तारः अस्मातोपस्थाप्याहिश्यतायाः सत्वात। अतएवव्यासज्यवृत्तेरूदे राम

श्यताव्यासज्यवृत्तिरेकेव। एकोद्देश्यत्वे चैवोद्देश्यतावत्वं॥ एवं घटद्वयं द्वावित्यत्र व्यासज्यवृत्तिवि
धेयनिरूपितोद्देश्यता व्यासज्यत्ति प्रत्युक्तं। समवायेनोद्देत्वानिरूपितोद्देश्यतायाः प्रत्येकंस
त्वात्। नच व्यासज्यवृत्तिसंबंधेन विधेयोद्देश्यताया व्यासज्यवृत्तित्वमाजाभावात्। अतएव
वेतद्भेदवद्दित्वादिपदभेदोनिवेश्य इति रस्तं। नच घटत्वेनोपस्थिते सह स्तत्वसंस्थान
यवद्दित्वादेरन्वयसंभवात्। सरूपाणामेकशेष इत्यस्मत्पक्षे तेतिवा चांतायमीइत्य
त्र जलत्वेन दृश्यते न च जलदुग्धयोरूपस्यत्वपर्यंततात्पर्यकत्वात्। तथा चैकाद्यावृत्तित्व
द्विषयीभूतमर्थमनुभावयतीत्येव नियमः प्रमाणाभिप्र पर्यवस्यतीति। वस्तुतस्तु। ताह
शनियमास्वीकारे भ्रिरामरामौ यच पयसी इत्यादेः साधुत्वचारणार्थस्वरूपाणामितिसू
त्रमन्यथा ताहशप्रयोगस्यापि साधुत्वामतेरितिध्येयं। आवृत्तिश्च स्वस्थानस्थं तस्य
पुनरनुसंधानं स्यातांतरस्थास्यानुसंधानमनुपगंः स्यातांतरस्थास्य स्वस्थाने

सधानमनुमितिः॥ एतच्चायं प्रस्तुतपदानां तत्र च पूर्वपूर्वं बलीयः अप्रस्तुतपदानां अनुसंधानमध्याहार
इति प्राचां। तन्न। विशेषदर्शनस्यासार्वत्रिकत्वेनैकदा तत्तद्विशेषाभिप्राये युगपद्बोधस्य दुर्वार
त्वात्॥ किं च बहुत्रानुरोधादेकोच्चारणात् तत्तद्विशेषाभिप्रायात् युगपदुभयबोधो दुर्वारः सामग्री
सत्त्वात्। प्रथममेतस्य चरममेतस्येत्यत्र नियामकाभावात् धारावाहिकस्थले प्रथमज्ञानोत्कार्यता
वच्छेदकावच्छिन्नस्य जायमानत्वेन तत्तत्क्षणादिकाभावात् व्यक्तिस्थानीयपदत्वेन दृष्टत्वात्स्वाका
रात् अपि तु यत्क्रमिकबोधाभिप्रायस्तत्रैवेति दिक्। तच्चैतात्पर्यमस्माकं लौकिकवा
क्ये स्वतंत्रो वेदे ईश्वरस्य। मीमांसकास्तु। पूर्वपूर्वाध्यायकतात्पर्यं पूर्वोक्तमेव वेदे तात्प
र्यमिति परतंत्रमनादित्वादिति। तन्न। कार्यद्रव्यानधिकरणाभावकार्याधिकरणारूप
प्रलयस्य श्रुतिसिद्धतया तात्पर्यस्यानादित्वासिद्धेः। भावकार्यानधिकरणकालरूप राम
महाप्रलयोपगमसिद्धत्वाच्चेति दिक्। विरत्तत्वेन शाखासमुदायत्वे वेदैकदेशस्पर्शा

स्यात्तेनान्योन्याश्रयापात्॥ नाप्यदृष्टजनकतावच्छेदकावच्छिन्नत्वे सति मीनशरीरावच्छिन्नेश्व
राशोक्तजातिमत्त्वं॥ ईश्वरोक्तलौकिकवाक्यवारणाय सत्यंतं। गीतावारणाय मीनशरीरावच्छि
न्नेति। ईश्वरपदं स्वरूपकथनाय मेति। मीमांसकमते लक्षणासिद्धेः॥ किं त्वारंवडोपाधिः तस्य
चेयावस्तु चार्व्वाकशाशोभिप्युक्तान वेदत्वव्यवहारः तत्रैव पर्याप्तेस्तत्पाठश्रवरोरावभूइादी
नाप्रत्यवायः॥ केचित्तु अभियुक्तैर्वेदत्वेन परिभाषितत्वं वेदत्वं। धातुत्वाख्यातत्वादिवत्प
रिभाषागर्भमेव इत्याहुः। तादृशवेदस्यापौरुषेयत्वं तस्मात्तपस्तेपानाच्चत्वारो वेदाश्चजा
यंते छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायतेत्यादिश्रुतेः॥ वेदाः पौरुषेयाः वाक्यत्वाद्भा
रतवदित्यनुमानाच्चसिद्धमरस्य स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुराशिवाद्या
ऋषिपर्यंताः स्मर्त्तारोस्य न कारका इत्यादि स्मृतिति चापौरुषेयत्वसिद्धिः तस्याः प्र
तिविरोधेतान्यत्रतात्पर्यात्। स्वयंभूत्वं नित्यत्वं किंतु नित्यज्ञानवज्जन्यज्जन्य

वा॥ अस्मदाद्यननुभूयमानजन्यत्वमिति केचित्। शिवाद्याइत्यत्र शिवनामकश्चिदृषिःशि
वशब्देनोक्ता: अतएव रागसंविज्ञानवह ब्रीहिर्वीन च भुत्वा पौरुषेयत्वसिद्धिर्वदि जानमा
नंदमित्यादि श्रुत्या आनंदस्यासिद्धिः स्यादितिवाच्यं। लाघवेन सूखत्वावछेदेन भूरास्मज्ज
नकत्वग्रहे तस्य लक्षगायाद्युः स्वाभावपरत्वादिति कृनित्यादृविनाशकल्पनागौरववभि
त्याशब्दस्यनित्यत्वसिद्धौ शब्दसमूहाय पदे रूपवेदस्यवाक्यार्थेताहिमज्जान्यत्वरूपयौ
रुषेयत्वे सिद्धिर्नोगमादमीति चेत्। न। वर्णात्मकः शब्दो नित्यः समवेतत्वे सत्युत्पत्ति
मत्वात् घटवदित्यनुमानात् तत्सिद्धेः॥ उत्पन्नोगकारो विनष्टो गकार इति प्रतीत्यात
स्तो। त्यादृविनाशसिद्धेश्च न चासौ भ्रांतिर्बाधकाभावात् न च सएवायं गकार इति प्रत्यभि
ज्ञाबाधिकात स्या गहत्ति गवछिन्नभेदाभावविषयत्वेनाबाधकत्वात्। तथा सति ग
कारोयमितिस्यान्नतु सोयमिति चेत्। न। सोयमित्यत्र गहत्ति गत्वावछिन्नाभेदा राम

स्वविषयत्वात्॥ गकारोयमित्यत्र गत्वावच्छिन्नाभेदस्यैव विषयो न तु गत्वतद्व्यक्तित्वमपि यत्र
तु जातौ जातित्वभानसामग्री तत्र तज्जातियोयमितिधीः संसर्गस्तु तज्जात्यवच्छिन्नभेदाभावः।
तद्व्यक्तित्वावच्छिन्नभेदाभावो वा॥ न चैकस्मिन्नस्मिन्नपि तज्जातीयोयमिति स्यात् इष्टत्वात्
गभिन्नत्वे सति गृहीते जातौ याभेदस्य भानांगीकाराच्च तथा प्रत्यय इत्यन्ये किं चोत्पादविनाश
प्रत्यययोरप्रामाण्यापत्त्या प्रत्यभिज्ञाया एव प्रामाण्यमित्यस्यापि सुवचत्वात् वस्तुतस्तु
विलक्षणवायुसंयोगादीनां गत्वादिकमेव कार्यतावच्छेदकं न तु गप्रत्यक्षत्वादिक
मित्यादि शब्दानित्यत्वसाधकानि द्रष्टव्यानि एतेन शब्दो नित्यो व्योमैकगुणत्वाद्धेमेत
समवेतगुणत्वात्मपरिमाणवदिति निरस्तं येन रूपेण वर्णानां स्फोटव्यंजकत्वं तेन रूपे
सार्थप्रत्यायकत्वे नैवोपपत्तावतिरिक्तनित्यस्फोटेपि न मानमिति दिक्। महास्तु शब्दे
द्रव्यसाक्षात्संबधेन प्रतीतिदिक्। स च शब्दो हि त्वादित्याहुः। तन्न अप्रयोजकत्वात्

अत एवाति स्पर्शद्रव्यत्वेन शब्दस्यानित्यत्वसाधने पि प्रत्यक्षं साक्षात्संबंधेन प्रतीयमानत्वात्तु ज्ञमिति
दिक् । स च शब्दो द्विविधः ॥ प्रवर्त्तको । प्रवर्त्तकश्च । प्रवर्त्तको विधिः ॥ तदन्यो । प्रवर्त्तकः प्रवर्त्तकत्वं
च प्रवृत्तिजनकेच्छाजनकज्ञानजनकत्वेन । प्रवृत्तिजनकेच्छा च कृतिकधीसाध्यत्वेन कृति
साध्यत्वप्रकारिका ॥ तज्जनकं कृतिसाध्यात्वप्रकारकं ज्ञानं न तु कृतिसाध्यत्वज्ञानाभावे गौर
वात् इच्छायाः समानप्रकारकधीसाध्यत्वेन कृतिसाध्यत्वप्रकारकज्ञानाभावे तो चिकीर्षानु
दयाच्च । अतस्तद्विषयः कृतिसाध्यत्वविध्यर्थः नच विषभक्षणादौ कृतिसाध्यताज्ञानात्प्र
वृत्त्यापत्तिवारणार्थं बलवदनिष्टाननुबंधित्वे न कृतिविशेषणीयेति चेत् । न इष्टाजनके
बलवदनिष्टाननुबंधिकृतिसाध्यत्वेन ज्ञाते प्रवृत्त्यापत्तेः इष्टाजनकत्वेन ज्ञातस्य कृति
बलवदनिष्टजनकैवकस्य कामेति न्यायादिति चेत् ॥ तत्रास्तु तथापीष्टाजनकत्वेन
ज्ञाने तदंशायां तद्दीयकृतौ बलवदनिष्टजनकत्वे ज्ञानयमो मानाभावादिति वाच्यं । नि

त्या

साध्यत्वसंशयेपि प्रवृत्त्यापत्त्या यागादिः साध्येति निश्चयस्य हेतुत्वे।। तच्चाशमाराधानिश्चयानास्कंदितकृतिसाध्यता
ज्ञानापेक्षया। शमाराधाज्ञानानास्कंदितकृतिसाध्यतानिश्चयत्वेनैव लाघवाद्धेतुत्वमिति वाच्यं। कृति
साध्यताज्ञानत्वेनैव हेतुतात्त्वाच्छमाराधनिश्चयेपि तु बलवदनिष्टानुबंधित्वनिश्चयाच्च दयादेव
न प्रवृत्तिरिति। न तु कृत्यसाध्यताज्ञानाभावो हेतुः कृतिसाध्यत्वसंदेहे शक्यत्वात कृतिसाध्यत्वनि
र्णये प्रवृत्त्यभावापत्तेः कृतिसाध्यत्वनिर्णयाभावविशिष्टत्वेन कृत्यसाध्यताज्ञानस्य प्रतिबं
धकत्वे चातिव गौरवमतः स्वकृत्यसाध्यतानिश्चयाभावोपि न हेतुः गौरवादिति प्राभाकरानु
यायिनः।। अपरे तु सन्नोधात्वर्थयोगाच्छावाचित्वात्कृतिच्छैवाचेकिंयासैव प्रवृत्तौ हेतुर्लाघ
वात्।। सा च कृतीष्टसाधनताज्ञानादितरेष्टसाधनत्वविषयिणी। तच्चोक्तं ज्ञानवत्त्वेति। प्र
कययोरेकस्याप्यत्वेन सन्निहितत्वात्। तच्चेच्छाया समानविशेष्यत्वप्रत्यासत्त्या प्रवृ
त्तिहेतुत्वान्न कृतिच्छाप्रवर्तिका।। किंतु कृतिसाध्यत्वप्रकारिकेच्छा साध्यत्वसंसर्गे राम

नित्येयाप्रवृत्तिस्तत्रश्रुतिविहितकालजीवित्वप्रतिसंधानजन्यकार्यताज्ञानंहेतुः॥ अन्यत्रेष्ट
साधनतालिंगकमिष्टसाधनताज्ञानंकालीनंचाकार्यताज्ञानंहेतुरितिनोक्तदोषः। नचेष्टसाध
नत्वविषयकंकार्यताज्ञानमेवहेतुर्नबलवदनिष्टाननुबंधादिविवाच्यं। साध्यत्वसाधनत्वयोर्वि
रोधेनएकदाएकत्रज्ञानासंभवात् प्रवृत्तिसामान्येचकार्यताज्ञानमेवहेतुरस्तुलाघवंबलव
दनिष्टाननुबंधित्वनिश्चयस्यहेतुः नचकृतिसाध्यताज्ञानत्वेनप्रवृत्तिहेतुत्वेकृतिसाध्य
त्वसंशयात्बहुवित्तव्ययायाससाध्येप्रवृत्त्यापत्तिस्तन्निश्चयत्वेनप्रवर्तकत्वेबलेत्यव्ययायाससा
ध्येकृतिसाध्यत्वसंशयात्प्रवृत्त्यनापत्तिरितिवाच्यं। कृतिसाध्यताज्ञानत्वेनैवहेतुत्वात्। संश
येबहुवित्तव्ययायाससाध्येप्रवृत्त्यभावस्तुबलवदनिष्टाननुबंधित्वसंशयेबलवदनि
ष्टाननुबंधित्वनिश्चयाभावात्। नचबलवदनिष्टाननुबंधित्वज्ञानत्वेनकृतिसाध्य
तानिश्चयत्वेनैवहेतुत्वमस्त्वितिवाच्यं। कृतिसाध्यत्वनिश्चयेपितत्संशयादप्रवृत्तेः। कृ

गाकृतिप्रकारिकेच्छेच्छावाहेतुरितिवाच्यं। यागत्वावच्छिन्नविशेष्यतासंबंधेन प्रवृत्तित्वनिष्ठविशेष्यता
निरूपितयागत्वावच्छिन्नप्रकारतासंबंधेन यागकृतिच्छायाः कृतिच्छायाइच्छायावाहेतुत्वा
त्। न चकार्यतावच्छेदकसंबंधस्यैकत्वात्। यागत्वावच्छिन्नविशेष्यतासंबंधेनैव कृतिप्रका
रिकेच्छायाइच्छायावाहेतुत्वमितिवाच्यं प्रत्यासत्तिलाघवेन वस्तुविशेषमई चानुपलक्षते
समवायेन सुखहेतुत्वेन कृताविष्टसाधनत्वज्ञानात्प्रवृत्तिस्तत्र कृतीच्छैव प्रवर्तिका न तु
कृतिविषयेच्छा कृतिविषये इष्टसाधनताज्ञानाभावादित्याहुः॥ परे तु अस्तु कृतिच्छापि प्रवृ
त्तिजनिका न तु कृतिच्छैव यागइष्टसाधनमित्यादिशाब्दबोधाद्यागादाविष्टसाधनताज्ञाना
त्तेहितिस्वकृताविष्टसाधनमेवनेतिकृतिच्छाया अभावात्। न चाननुगमः कृतिप्रका
रतानिरूपितायायागत्वावच्छिन्नविशेष्यतायाश्चकृतिनिष्ठविशेष्यतानिरूपी
ता यागत्वावच्छिन्नप्रकारतान्यतरसंबंधेनेच्छात्वेनैव यागत्वप्रकारकप्रवृत्तौ

हेतु॥ तथापि प्राणपंचकसंचारसारे जीवनयोनियत्नातिसाध्येकृतिसाध्यताज्ञानात् प्रवृत्त्याप
त्तिः न चेतन्न मानाभाव॥ प्राणक्रियायत्नजन्याक्रियात्वाच्छरीरक्रियावदित्यनुमानात् त
सिद्धेः॥ ज्ञानादेर्नाशं प्रति स्वोत्तरोत्पन्नरोत्पन्नयोग्यजातीयविशेषगुणस्य कारणत्वात् सु
षुप्तेः पूर्वज्ञानादिनाशार्थं तत्स्वीकाराद्वा तत्तद्वेतीति चेत् । न । वात्यावायुक्रियायां व्यभिचारे
णानुमानासिद्धेः न चेत्तत्रापीश्वरयत्नजन्यत्वसत्त्वान्न व्यभिचार इति वाच्यं । तर्हि
ईश्वरयत्नजन्यत्वेनासिद्धसाधनादर्थान्तरत्वाद्वा ज्ञानादिनाशं प्रति स्वोत्तरोत्पन्नत्वेनै
वहेतुत्वावृत्तेरित्याहुः ये तु जीवनयोनियत्नस्वीकारयत्नेऽपि तत्र प्रवृत्तिवारणाय प्र
वृत्तित्वेनेष्टसाधनताज्ञानं कारणमाहुः तन्न । न चेत्तर्हि शक्यकृतिसाध्यत्वभ्रमात्
यत्ने दुर्वारत्वात् स्वानुपायोग्यत्वेन प्रवृत्त्यभावस्तुल्यः स्वर्गेन हस्त्यापत्ते रोष
मारणाभाव॥ प्रवृत्त्यभावस्यैवविषहविष्यात्वभ्रात्व्यापत्ते दुर्वारत्वात् स्वरू

त्वात्। न च निवृत्त्यभावस्य प्रवृत्तिरिति वाच्यं। सुषुप्तौ निवृत्त्यभावसत्वात्। प्रवृत्तिकार्यचेष्टायाप
त्तेः॥ न च निवृत्तेरसिद्धौ तज्जनकत्वेन द्वेषसिद्धिर्नस्यादिति वाच्यं। शत्रुं द्वेष्मीत्यनुभवात् तत्सिद्धे
रिति दिक्। नैयायिकास्तु। क्रियां विना केवलकृतितः सुखादेरनुत्पत्त्या तत्फलोपधायकजनकज
नकतासंबंधेन क्रियावत्कृतेजनकत्वं वाच्यं। तदर्थे स्वया कृतिसंबंधेन क्रियायाः सुखहेतुत्वेला
घवात्॥ किंच कृतेः क्रियाद्वारैव सुखादिजनकं वाच्यं॥ तथा च क्रियायामिष्टसाधनत्वेन तृ
त्वात्कृतेरिष्टसाधनत्वं ज्ञातव्यमिति क्रियेच्छायाः सर्वत्र सत्वात् सैव प्रवृत्तिहेतुर्विशेष्यतायाः कार्य
तावच्छेदकाकारता तावच्छेदकसंबंधत्वे लाघवाच्चेति क्रियायामेवेष्टसाधनत्वं बलवदनिष्टान
नुबंधिकृतिसाध्यत्वं च विध्यर्थोन्वेति॥ न च नित्ये फलाभावादिष्टसाधनत्वाभावः। त
त्रापि बहुशः फलश्रुतेः यत्र च न फलश्रुतिः तत्र विश्वजिन्न्यायात् स्वर्गस्य प्रत्यवायपरि
हारस्य वा फलकामनाधीनकर्तव्यत्वेपि प्रत्यवायसाधनं॥ भूताभावप्रतियोगित्वेन

नित्यत्वे फलकामनाविरहदशायां तत्प्रयुक्ताभावस्त्विष्ट एव। न च स्वर्गकामनां विना कृता ज्योति
ष्टोमात्स्वर्गोत्पादवारणाय स्वर्गकामनाया अधिकारिविशेषणं शौचादिवदावश्यं॥ तथा। चकारणा
चेत् शौचादेरधिकारणात्वं न तु कामनायाः प्रमाणाभावात् कामनाविरहदशायां ज्योतिष्टोमाकरणेपि प्रत्य
वायो न स्यात् अशुचेरिव तदाप्यनधिकारित्वादिति वाच्यं प्रत्यवायोत्पत्तौ संध्यावंदनाकरणस्य
त शौचादेरधिकारणत्वं न तु कामनायाः प्रमाणाभावात्। केचित्तु कामनेतरयावदधिकारवता
अकरणे प्रत्यवायहेतुत्वात् बलवदनिष्टाननुबंधित्वस्य कृतिविशेषणत्वमक्षुधि
तस्य एतादृशभोजने प्रवृत्तेः॥ न वा नकलंजभक्षणेपि तत्र कलंजभक्षणे कृतिसाध्यत्वेष्टसा
धनत्वविध्यर्थे निषेधानुपपत्तिः॥ तत्र बलवदनिष्टाननुबंधि कृतिसाध्यत्वाभावस्य तादि
शेषणाभावे नो विशिष्टाभावात्॥ न च श्येनस्य हिंसात्वेन नरकरूपबलवदहितसाधन
त्वे न कथं श्येनेनाभिचरन् यजेतेत्यत्र विधिप्रवृत्तिरिति वाच्यं। श्येनोहि बदध राम

ननु तु नरकसाधनमिति न तत्र विध्यर्थान्वयानुपपत्तिः श्येनादेर्वधाख्यनरक इति तत्रास्ति कांक्षा
प्रवृत्तिः यद्यपि फलवदिति इष्टप्रयोजकेपि प्रवृत्त्यभावात् फलवदनिष्टाप्रयोजकत्वज्ञानमेव प्रवर्त
कमिति विध्यर्थोभिमतस्त्विति। श्येने विध्यर्थे बाध एव तथापि विध्यर्थो बलवदनिष्टाजनकत्वमे
व बलवदनिष्टाप्रयोजकत्वज्ञानं तु मानसमेव मत्कृतिसाध्यताज्ञानवत् नहि प्रवर्त्तकं ज्ञा
नं विधिजन्यं किंतु मानसं न चाहिंसाया नरकसाधनस्यागमादेवगततात् श्येनस्याभिच
रणोद्देश्यकमरणानुकूलव्यापारत्वेन हिंसात्वाद्विध्यर्थान्वयस्तदवस्थ इति वाच्यं। कूपख
ननस्य विहितत्वेन कूपकर्तुर्गोवधकर्तृकत्ववारणाय मरणोद्देश्यकत्वे विशेषणवत् श्येन
स्याविहितत्वेनाहइष्टाहारकत्वेनापि मरणानुकूलव्यापारस्य विशेषणीयत्वात्। अन्यथा
त्रिसंध्यं गंगामरणोद्देशेन कृतस्नानपाठादेर्हिंसात्वापत्तेः। तथा च श्येनस्यादृष्टद्वा
रकत्वाहिंसात्वाभावान्न विध्यर्थान्वयानुपपत्तिः। अत्रेदं बोध्यं। श्येनस्य हिंसात्वे

पिपाणीयहिंसा वहुलत्वदृष्टानिष्टाननुबंधित्वान्वये न किंचिद्बाधकमस्ति। वस्तुतस्तु बलवदनि
ष्टाननुबंधित्वकृतेर्विशेषणां कृतिसाध्यांसत्वे त्वविनिगमकाभावात्। प्रत्येकमेव शब्द
तया च शब्देनाहो बलवदनिष्टाननुबंधित्वस्यायोग्यत्वाद् नन्वेयोपि इष्टसाधनत्वकृतिसाध्य
त्वयोरन्वयो नानुपपन्नः। एवं नकलंजं भक्षयेदित्यत्र नञर्थबलवदनिष्टाननुबंधित्वस्यै
वान्वयो न तु कृतिसाध्यत्वइष्टसाधनत्वयोस्तयोस्तत्रसत्वात्। न च श्येनविध्यर्थे बलवदनिष्टा
ननुबंधित्वान्वये बलवदनिष्टाननुबंधित्वज्ञानं स्यात्प्रवृत्तेकस्याभावात्कथं तत्र प्रवृत्ति
रिति वाच्यं। अगम्यागमनादाविवरागांधानामनसाभ्रमरूपतादृशज्ञानादेव प्रवृत्तेः। न
चेज्योतिष्टोमादावपि मानसबलवदनिष्टाननुबंधित्वज्ञानादेव प्रवृत्तेरुपपत्ते बलवद
निष्टाननुबंधित्वस्य शक्यत्वे मानाभाव इति वाच्यं। तस्माच्छक्यत्वे कलंजं भक्षयेदित्य
त्र विध्यर्थनिषेधान्वयत्वेऽरिष्टसाधनत्वकृतिसाध्यत्वयोर्विध्यर्थयोस्तत्रसत्वात्

न बलहृसीयपलबलवदनिष्टाननुबन्धित्वस्य निषेधोऽस्त्विति वाच्यं ॥ विधौ लघ्वरागायात्रनं गौरवे
स्यसवेसमतत्वात ॥ अन्यथा विधिनिषेधाभ्यां निःकम्पप्रवृत्तिनिवृत्त्योरजनकतापत्तेः ॥ इदं तु बो
बोध्यं । इष्टे बलवदनिष्टाननुबन्धित्वे ज्ञानवत स्वकृतिसाध्यताज्ञानं तच्च ज्योतिष्टोमादावब
बलवदनिष्टाननुबन्धित्वस्य कृतिसाध्यत्वस्य च मनसैव ज्ञानसंभवादिष्टसाधनत्वमेव वि
धार्थः न च मदीयेष्टसाधनताज्ञानं वा इष्टसाधनताज्ञानं मममिमानसमस्तु किं तत्रापि शक्येति
वाच्यं ॥ नीहयागहोमादिष्टसाधनताज्ञाने प्रवर्तते कें किं तु स्वर्गसाधनताज्ञानं तच्च विधिनाज
न्यते तावन्मात्रेणच्च न प्रवृत्तिरिति स्वर्गेच्छापूर्वकत्वात् कारीरीसाधनस्वर्गज्ञानात् । तथा च स्व
र्गादीष्टस्वर्गादिसाधनताज्ञानमिदं इष्टं चोपायेच्छाद्वारा प्रवर्तते हेतुः इष्टकृतिसाध्यत्वस्य
ज्ञानं तु साक्षात्तच्च तस्मिन्नेव सामग्रीतत्स्वरूपादिज्ञानान्वयव्यतिरेकाभ्यां गृहीतं तु श
शक्यं कलञ्जभक्षणोत्तुलसरीयबलवद्द्वेषनिबलवदनिष्टाननुबन्धित्वस्येबन्धित्वस्यैव नि

त्या॰

।निषेधोस्त्विति वाच्यं। विधौ लक्षणाया अनंगीकारे समर्थे संमतत्वात्। अन्यथा विधिनिषेधाभ्यां
कंचपुरुषं प्रवृत्तिनिवृत्त्योरजननापत्तेः॥ इदं तु बोध्यं। श्येनेनैव बलवदनिष्टाननुबंधित्वज्ञानवतः स्वकृ
तिसाध्यताज्ञानवत्त्वं ज्योतिष्टोमादावपि बलवदनिष्टाननुबंधित्वस्य कृतिसाध्यत्वस्य च मनसैव
ज्ञानसंभवादिष्टसाधनत्वमेव विध्यर्थः॥ न च मदिष्टसाधनताज्ञानं वदिष्टसाधनताज्ञानं ममाभिमा-
न समस्तु किं तत्रापि शब्देनेति वाच्यं। न हि यागादौ मदिष्टसाधनत्वमेव विवेचनताज्ञानं प्रवर्तकं किंतु
र्गसाधनताज्ञानं तत्र विधिना जन्यते तावन्मात्रेणैव प्रवृत्तिरिति स्वर्गकामितत्सहकारिणोसा
चस्वर्गज्ञानात्। तथा च स्वर्गादिच्छा स्वर्गादिसाधनताज्ञानमिदं मे चेतीच्छाद्वारा प्रवर्तकं नो हे
तुः कृतिसाध्यत्वस्य ज्ञानं तु सामग्र्यादेस्तस्मिन् न तत्सामग्रीतस्स्वरूपादिज्ञानादन्वयव्यति रे
वाकाभ्यां ग्रहीतुं शक्या कलंजभक्षणादौ बलवदनिष्टाननुबंधित्वस्यैव निषेधः॥ तद्विधौ परश
क्त्यादि इत्यर्थकविधेरेव ग्रहणात् च तु निवर्तकविधेरिति प्रकृतमतस्य भावः॥ ननु नन्वस्तु इष्टसाधन राम

त्वमंत्र कृतिसाध्येष्टसाधनत्वं बलवदनिष्टाननुबंधित्वंत्रयं वा विध्यर्थः। तथा च कृतिसाध्यता
ज्ञानं बलवदनिष्टाननुबंधित्वाज्ञानमिष्टसाधनज्ञानं प्रवर्त्तकं तत्रेष्टसाधनताज्ञानमुपाये
च्छाद्वारा यं तु स्वातंत्र्येणापि वा यागत्वावच्छिन्नविशेष्यताप्रवर्त्तकतान्तादृशविशेष्यतया कृतिसाध्य
त्वप्रकारकेच्छैव बलवदनिष्टाजनकताज्ञानसहिता हेतुस्तत्र च कृतिसाध्यताज्ञानमिष्ट
साधनताज्ञानं जनकं। अथवा बलवदनिष्टाननुबंधित्वाज्ञानमप्युपायेच्छाद्वारा प्रवृत्तिहेतुरि
त्यत्र विनिगमकाभाव इति चेत्। न। कृतिसाध्ययागोद्देश्यका कृतिसाध्यः यागो भवत्वितीच्छे
च्छातत्र कृतिसाध्ययागत्वधर्मितावच्छेदकमिष्टसाधनताज्ञानं हेतुः तथा च यागत्वेनया
गे कृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानात् प्रवृत्त्यभावापत्तेरिति। कश्चित्तु यद्येतु यागत्वेन यागे
ष्टसाधनताज्ञानेपि यागत्वेन कृतिसाध्यताज्ञानात् कृतिसाध्यत्वप्रकारकेच्छोत्पत्तेः। य
द्धर्मविशिष्टे इष्टसाधनताज्ञानं तद्धर्मविशिष्टे यदुपायसाध्यताज्ञानं तदुपायसाध्यत्वप्र

कर्मीकेच्छाति। नचैवं स्वप्रवृत्तौ हेतुरस्त्विति वाच्यं॥ विशेष्यतया प्रवृत्तौ विशेष्यतयेच्छात्वेनैव
कारणता न तु कृतिसाध्यप्रकारकेच्छात्वेन गौरवात्। न च कृतिसाध्यत्वप्रकारकज्ञानस्य
प्रवृत्तौ कारणत्वे गौरवमिति वाच्यं। इष्टसाधनत्वे ज्ञाते पाके कृतिसाध्यप्रकारकसंशयात् कृति
साध्यत्वप्रकारकेच्छासत्त्वेपि पाके कृतिसाध्यत्वसंशयान्निःकंपप्रवृत्त्यनुदयात् तादृशप्रवृत्तौ कृति
साध्यत्वप्रकारकनिर्णयस्य हेतुत्वावश्यकत्वे तद्धायायवलाघवेन प्रवृत्तौ हेतुत्वमित्या
हुः॥ तन्न। कृत्यविज्ञायां साध्ये कृतिसाध्यत्वसंदेहेपि प्रवृत्तेर्वृत्तविज्ञायां साध्ये तु कृति
साध्यत्वसंदेहे बलवदनिष्टाननुबंधित्वसंशयेन निष्कंपाभावादेव प्रवृत्त्यनुत्पत्तेः। नचा
त्यायासाध्ये यन्निःकंपप्रवृत्तौ कृतिसाध्यत्वनिश्चयो हेतुरिति वाच्यं निःकंपत्वानि
रुक्तेरिति दिक्। परे तु कृतिसाध्यत्वनिर्णय एव चिकीर्षा हेतुः स्वल्पव्यापारसा
ध्ये कृतिसाध्यत्वसंशयात् प्रवृत्त्यभावस्त्विष्ट एवेति चिकीर्षैव प्रवृत्तिहेतुरित्याहुः॥

नन्वस्तु तिस्तस्यापि संध्यामुपासते ये तु सततं शंसितव्रता विधूतपापास्ते यांति ब्रह्मलोकं सना
तनमित्यादावघोषितफलसाधनत्वं तथापि तादृशब्रह्मलोकादिफले प्रहानकामनात
द्वासंध्यावंदनादौ प्रवृत्तिर्नस्यात्। इष्टसाधनत्वेनाता नचतद्धाप्रत्यवायाभावरूपेष्टसाधनताज्ञा
नात्तत्र प्रवृत्तिरिति वाच्यं॥ अस्तंताभावादीनादितयात्तद्वायध्वंसस्यैव फलत्वं वाच्यं। तत्र
न संभवति दुरितध्वंसार्थिनोपत्र प्रवृत्तिस्तस्मिन् दुरितस्याधिकारितया तस्मिन्नधिकारितत्
दुपस्य प्रवृत्तिकत्वे न तन्निष्ठापस्यापि हेतुत्वेन तन्निष्ठपाभावात्। नच प्रायश्चित्तमेसानां तत्प्रायश्चि
त्तादुरितध्वंसोत्तन्निवारणाय दुरितध्वंसे दुरितस्यावश्यं हेतुतावाच्या॥ तथा च तन्निष्ठपस
हेतुत्वेन मानाभावमिति वाच्यं। दुरितवत्तामेवगमेनाधिकारित्वेषो धनात्तन्निष्ठपस्यापस्या
पितत्रहेतुत्वमिति चेतान। संध्यावंदनादौ तत्यागसामाभावात्संगत्तवदुरितध्वंसापि
प्रवृत्त्युपपत्ते। वस्तुतो दुरितान्निष्ठापाप्यचास्त्येवेतिध्येयं। नच दुरितध्वंसेय हानकाम

जातत्वात्प्रवृत्तिर्न स्यादिष्टत्वादित्याहुः अन्ये तु संध्यावंदनाकरणेऽनिष्टार्थवादेन नरकश्रुतेः॥ प्रा
यश्चित्तोपदेशाच्च प्रत्यवायकल्पनेन प्रत्यवायपरिहारसाधनत्वेन तत्रेष्टसाधनताज्ञानान्निय
मतः प्रवृत्तिः प्रत्यवायपरिहारः प्रत्यवायप्रागभावाः तस्यानादित्वेपि यस्मिन्सत्यग्रिमक्षणोत्पत्ति
त्वं यद्व्यतिरेके त्वसत्त्वसत्त्वमिति योगक्षेमसाधारणसाध्यत्वं तज्ज्ञाप्यमतमित्याहुः परे तु निंदार्थ
वादेन प्रायश्चित्तोपदेशेन चोपासनाभावस्य प्रत्यवायहेतुत्वावगमाद्यासनाभावस्य प्रत्यवा
यद्वारादुः खसाधनत्वावगमात्तदभावस्य संध्यावंदनस्य दुःखसाधनताभावत्वेनेष्टत्वं त
था च दुःखसाधनाभावरूपसंध्यावंदनस्य दुःखसाधनत्वाभावत्वेनेष्टत्वं तथा च दुःखसाध
नाभावरूपसंध्यावंदनरूपेष्टसाधनत्वज्ञानादेव तत्र प्रवृत्तिरिति॥ नन्वस्त्वार्थ
वादोपस्थितदुरितध्वंसरूपेष्टसाधनत्वज्ञानात्संध्यावंदनादौ प्रवृत्तिः॥ अत एव स्व
दारगमने प्रवृत्तिः कार्या। तत्र प्रत्यवायध्वंसस्यापि वाहादन्नु प्रायश्चित्तफलत्वात्।ना राम

नापि द्वि प्रागभावस्यासन्तानादित्वे असाध्यत्वात्तस्यानंगीकाराच्चेति चेत्। न। जतुस्नातं
तु यो भार्यामित्यादिवच्च नैकवाक्यवयाजतुकाष्ठिनस्यागमनाभावस्य प्रचयजनकतया
परिहारार्थत्वेन प्रवृत्तेः न चैतत्परिहारस्य तत्तत्प्रागभावरूपत्वे नोक्तरूपेण फलत्वासिद्धि
रिति वाच्यं॥ प्रागभावस्यातीन्द्रियत्वेनानंगीकारेपि तद्धेतुकाभावेतरस्यापि साध्यत्वांगीकारा
दिति कश्चित्। न तु कुतः प्रागभावानंगीकारः तस्य तेषु प्रमाणाभावादिति त्वेलक्ष्ये इह के
चिद् घटो भविष्यतीति प्रत्यक्षानन्तरं घटो भविष्यतीति प्रयोगादिघमानप्रागभावप्रतियो
गित्वरूपभविष्यत्त्वस्य प्रत्यक्षविषयत्वेन प्रत्यक्षमेव प्रागभावे मानं। न चैकदिक्क
पालसंयोगप्रत्यक्षेपि घटो भविष्यतीति प्रत्ययाभावात् घटध्वंसे चारित्वेनाज्ञानवि
षयस्य घटजनकत्वेन ज्ञातस्य तत्प्रत्यक्षे हेतुत्वे गौरवादिति। प्रागभावस्याप्यत्वे नत
ज्ञानस्य हेतुत्वं वाच्यं तथा च तेन प्रागभावानुमितिरेवास्तु वाच्यं। समानविषये
प्रत्यक्षसामग्र्या बलवत्त्वेन प्रागभावप्रत्यक्षस्यैव संभवात्। न च प्रत्यक्षसाम

ग्राबल्यवत्त्वे मानाभाव इति वाच्यं। स्थाणुर्वा पुरुषो वेति संशयोत्तरं पुरुषे हस्तव्याप्यशिरःपा
ण्यादिमानिति विशेषदर्शनोत्तरं पुरुषप्रत्यक्षस्यैव मानत्वात्। न च तत्र लौकिकप्रत्यक्षसा
मग्र्याः सत्त्वेऽनुमितिबंधकत्वं वाच्यं॥ तथा च प्रत्यक्षसामग्र्यां कथं पर्वतानुमितिरिति वाच्यं।
तद्विधेयकानुमितावेतत्प्रत्यक्षसामग्र्या अविरोधित्वात्। एवं पर्वतविधेयकानुमितिसामग्र्या
पर्वताद्यविषयकप्रत्यक्षे पर्वतलौकिकविषयताशून्यप्रत्यक्षस्यैव प्रतिबंधकत्वेन पर्वतानुमि
तिकाले पर्वतप्रत्यक्षं॥ भिन्नविषयकानुमितिसामग्र्याः तादृशप्रत्यक्षेतरलौकिकविषयताशू
न्यप्रत्यक्षे प्रतिबंधकत्वात्। न चानुमितिसामग्र्याः प्रत्यक्षत्वमेव प्रतिबध्यतावच्छेदकमस्तु
लाघवान्न तु उक्तप्रतिबध्यप्रतिबंधकभावः गौरवात्। सर्वत्रानुमित्युत्तरमेव प्रत्यक्षोत्पत्ति
स्वीकारादिति वाच्यं तज्ञानुमिनोमीति॥ अनुव्यवसायाभावात् साक्षात्करोमीति राम
प्रत्ययसत्त्वाच्चानुमित्यभावसाधकप्रत्यक्षस्यैव प्राबल्यात्। कालादिघटितानेक

ककारणानां प्रतिबंधकत्वेमानाभावात्ः असाधारणतत्तत्कारणानामेव प्रतिबंधकत्वस्वीकारा
त्॥ किं चानुयोगिताविशेषस्याखंडोपाधिरूपस्य वा प्रागभावत्वस्य व्याप्यज्ञानादनुमानासंव
भः॥ अत एव सामग्रीज्ञानानंतरसामग्र्याव्याप्यत्वेन ज्ञानात्प्रागभावप्रत्यक्षं वाच्यं॥ तन्नाच प्राग
भावस्य नष्टत्वात्तत्प्रत्यक्षं किं त्वनुमितिरितिपरास्तं। सामग्रीकालेपि प्रागभावव्याप्यत्वेन सा
मग्रीज्ञानाद्यीतिचेत्। न। वर्त्तमानत्वस्यातींद्रियत्वेन तद्घटितभविष्यत्वस्यालौकिकप्रत्य
क्षासंभवात्। किं च। भविष्यत्वं वर्त्तमानकालोत्तरकालोत्पत्तिकत्वं न तु भवद्भिर्मतं। तथा सति
देशकालयोः प्रागभावे प्रतियोगिनि वान्वयो वाच्य॥ तथा चेष्टो भविनि अघ भविष्यत्यघभावि
निष्ठो भविष्यतीति प्रत्ययप्रसंगात्। अन्यथोत्पन्ने रहवर्त्तिनि गृहे भविष्यतीति प्रत्ययप्रसंगात्।
उभयत्र कालस्यान्वयासंभवेनान्याहशमेव भविष्यत्वं निर्वाच्यं तथा च देशस्य प्रागभावेऽन्व
येबाधकाभावेपि न क्षतिः। इह घटो भविष्यतीत्यादौ ताहशोत्पत्तौ देशविशेषः कालविशेषश्च

सा:

धिकरणत्वेनान्वेतिनत्वात्तिमति। तेनाद्यभवनेसमुपस्थ्व ध्वंसोवर्ततीतिनष्टः ध्वंसोभवि
ष्यतीतिप्रत्ययः केचित्तुघटेस्याद्यिघटध्वंसप्रागभावत्वात्कपालनाशजन्यघटनाशस्यकपाले
घटध्वंसोभविष्यतीत्याप्रत्यानप्रागभावेदेशान्वयइत्याहुः तन्न। नाशोत्पत्त्यधिकरणोऽत्र नाशप्रा
गभावस्वीकारात्॥ अज्ञोत्पत्तिर्धात्वर्थः प्रत्ययार्थः वर्तमानकालोत्तरकालिनत्वंतत्त्वंधात्वर्थेचेति
धात्वर्थस्तु आस्पात्तार्थाश्रयत्वेतयाचघटोवर्तमानकालोत्तरकालिनोत्पत्त्याश्रयइतिबोधः नतु
प्रत्ययार्थोवर्तमानकालोत्तरकालित्त्वित्वंतया चघटो वर्तमानकालीनोत्पत्तिकार्यीत्पत्तित्वा
श्रयइतिस्यात्सचनसंभवति। उत्पत्तेरुत्पत्त्यनंगीकारात् तदंगीकारेपिलाघवेनोक्तस्यैवप्र
त्ययार्थत्वात्। ननुधात्वर्थकादेरन्वयेष्यभाविनाशकेपरमेनंक्ष्यतीतिप्रत्ययःस्यात्। ना
शस्यधात्वर्थस्यधात्वर्थस्यपरस्य संबंधित्वात्। नष्टेचनश्यतीतिस्यात्। नाशस्यवर्तमान
त्वात्। नष्टइतिनस्यान्नाशेवर्तमानध्वंसप्रतियोगित्वरूपातीतत्वाभावात्कैनिचेत्। न। राम

नंक्ष्यतीत्यत्रानागतानश्यत्तित्त्वविद्यमानं नष्ट इत्यत्रातीतोत्पत्तिर्धात्वर्थो बोध्यते। तत्रोत्पत्ति
तेस्सप्ताया धात्वर्थे॥ अतीतत्वादिकं तु पूर्ववत्तत्प्रत्ययार्थेऽस्तु। तस्यां कालादेरन्वयः तथा चाति
ताया उत्पत्तिस्तत्त्वोयो नाशस्तत्प्रतियोगी घट इति बोधः धात्वर्थयोः परस्परान्वयस्य युगप
द्वृत्तिद्वयस्य च स्वीकारादिति केचित्। दीधितिकृतस्तु नाहशोत्वते प्रकृते लक्षणाया प्रत
यार्थत्वात्। तस्माधात्वर्थनाशेऽन्वयमाहुः धातोरेव तादृशोत्पत्तिकनाशे लक्षणेत्यपरे। केचि
त्तु तत्र तेऽपि उत्पत्तिस्वीकारादिति तानागतोऽविद्यमानोत्पत्तिरेव तत्तत्प्रत्ययार्थः। तथा च तस्यामे
व देशकालादेरन्वयमाहुः। ननु त्वत्तावनागतत्वं वर्त्तमानप्रागभावप्रतियोगित्वं तथा च नं
तथा च नंक्ष्यतीत्यत्र विद्यमानप्रागभावप्रतियोगिया उत्पत्तिस्तद्धारयो नाशः तत्प्रति
योगी घट इति बोधादेव प्रागभावप्रतियोगित्वसिद्धिरिति चेत्। न। वर्त्तमानकालोत्तरका
लीनत्वस्यैवोत्पत्तावनागतत्वात्। केचित्तु नष्ट इत्यत्रातीतकालसंबंधित्वमतीत

त्वं वर्त्तमानकालसंबंधित्वं वा निवारणार्थं तस्य धात्वर्थनाशेन्वय इति॥ तन्न॥ चिरनष्टेपि पूर्वे
दिनवृत्तिपातित्वकालहत्तित्वस्य सत्त्वात्पूर्वेद्युर्नष्ट इति प्रत्ययापत्तेः नाशे वर्त्तमानत्वरूपाद्यु
नोपि सत्त्वाद्द्युनानष्ट इति प्रत्ययापत्तेश्च। अन्ये तु नशधातोर्नाशसामग्रीवोधः न
ष्टपदस्य सामग्रीघटको प्रसर्वेऽवर्त्तमानत्वान्वयः नश्यति नष्ट इत्यत्र तत्काद बोधे प्रयुक्ते
ष्टोविदेवातिलत्वानागतत्वयोरन्वय इत्याहुः तन्न। सामग्र्याएकस्याः अभावादनंत
शक्तिकल्पने गौरवापत्ति प्रसंगात। परेतु यथा ध्वा घस्राणां संबंधत्वात्। तथा चरमघस्राणां सं
बंधो नाशः तथा च नष्ट इत्याहेरूपपत्तिरिति। तन्न। गुरुमते तथात्वसंभवेपि न्यायपक्षे ला
घवेन नाशत्वविशिष्टस्य शक्तौ राघत्वचरमत्वयोर्निवेशनाच्च। न चोक्तो नभिवोहेना
तिरिक्त नाशे प्रमाणं॥ चिरनष्टेपि मणौ मणिध्वंसाद्यहोत्पत्तेः मतापूरध्वंसात
खंडपटोत्पत्तेश्च। न च चरमघस्राणां विशिष्टमेतापरोहितियस्रारवंडपटाभावत

मर्हेति जन्यद्वये द्वक्षस्य प्रतिबंधकत्वात्। क्षणस्य क्षणिकस्योपगमेन नाशस्यातिरिक्तस्यैवेष्यमु
पेयत्वात् तत्र चरमक्षणाभावात्। न च स ध्वंसस्य उत्पत्तिर्नाशश्चेद्द्वाभ्यां न्युत्पद्यते न नश्यति चेति प्र
त्ययापत्तेः किंच चरमक्षणासंबंधत्वस्य नाशत्वेनाशे विद्यमानध्वंसप्रतियोगित्वरूपातितत्ता
भावेन नष्ट इत्यादेरनुपपत्तिः॥ केचित्तु भूयत्वायामित्यनुशासनाद्वस्तुस्वरूपास्मत्ताधात्व
र्थ॥ आकाशमस्तीत्यत्रेवाकाशं भवतीत्यत्रेस्यापत्तिरेऽयं घटो भविष्यतीत्यत्र। परश्विने भविष्यतीत्यादौ सप्त
म्यान्तत्वनिर्वोध्यते। शरदि पुष्यंति सप्तच्छदा इत्यादौ सप्तम्यान्तत्वार्थैकत्वव्यवस्थापनात् उ
त्पत्तौ तात्पर्यकत्वेपि क्षते॥ सत्यपस्य वर्तमानप्रागभावप्रतियोगित्वमेवार्थः तथा च व
र्तमानप्रागभावप्रतियोगिशिरा यदाहि नीयापादुत्पत्तिः तद्दत्वात्तत्प्रयोगः नेत्यतिला
दौ नाशे सप्तम्यर्थो त्यसत्त्वयः नष्ट इत्यादौ वर्तमानत्वमेव निरर्थः सप्तम्यान्तत्वाद्यर्थ
कत्वे नैव पूर्व दोषनिरासात्॥ न श्यतीत्यादौ परं वर्तमानोत्पत्तिः प्रत्ययार्थः उत्पत्ति

तेइत्यादौसप्तम्यर्थ आधेयत्वम् तच्चोधात्वर्थेन्वेतीत्याहुः। ननु घटोत्पत्तेः पूर्वं घटो नास्तीति प्रत्य
यस्य ध्वंसात्यन्ताभावाद्यविषयकं प्रागभावविषयकमिति प्रागभावसिद्धिरिति चेत्। न। प्रागभा
वानंगीकारेणात्यन्ताभावविषयकत्वात्। इह घटप्रागभाव इति प्रत्ययस्तु न कस्यापि
केचित्तु पूर्वत्वं प्रागभावाधिकरणसमयवृत्तित्वं तत्पूर्वत्वं तत्प्रागभावाधिकरणसमयवृत्ति
त्वं उत्पत्तिमत्स्वाधिकरणक्षणवृत्तिप्रागभावप्रतियोगिसमयसंबंधरूपात्स्वाधिकरणक्षणवृ
त्तिपावात्प्रागभावाधिकरणसमयसंबंधरूपात्प्रागभावं विनासंभवात पूर्वत्वं च स्वाधिकरण
यावत्कालवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वं उत्पत्तेरपि स्वाधिकरणसमयेध्वंसानधिकरण
समयसंबंधरूपपदार्थसमयत्वं यत्तत्समयत्वं यत् यत्समयवृत्तिध्वंसप्रतियोगित्वाभाववत्वा
प्यंतत्तामयसंबंधरूपायावा स्वीकारात्॥ अतएव महाप्रलयांकारेतदुत्पत्तौ नाव्या राम
प्तिः यद्यदधिकरणक्षणवृत्तियत्क्षणवृत्तिध्वंसप्रतियोगित्वं यद्वद्वृत्तिप्यपत्तस्य

शावृत्तिधर्मसतियोगित्वं तस्य तत्तद्वंधस्य तदुत्पत्तिपदार्थत्वात्॥ अतएव स्वजन्यविभागप्रागभावावधि
न्नेत्रिक्रियासत्त्वाइति प्रागभावसाधकं निरस्तं सत्त्वात्वे च स्ववृत्तिविभसप्रतियोग्यानाधारत्वस्य स्ववृत्तिधं
सप्रतियोगिप्रतियोगिकयावद्धर्मविशिष्टत्वस्य। स्ववृत्तियावद्धर्मविशिष्टत्वस्य वस्त्रात्वस्यौका
रात्। केचित्तु तंतुत्वे न पटत्वेन कार्यकारणभावस्वीकारात्। सहस्रतंतुकपटस्य स्वानधि
करणीभूततंतूत्पत्तिकारणायत्तत्पटं प्रति तत्प्रागभावस्य हेतुत्वे न त्वनेतानां तत्तत्तंतूनां त
त्वे तद्धेतुत्वे गौरवापत्तेः॥ न चैतत्तंतरेषु पटोत्पत्तौ तस्यैव प्रतिबंधकत्वमन्यथा द्वाइव्यजनक
संयोगाभावादेव न तदुत्पत्तिरिति वाच्यं॥ पटांतरोत्पत्तिसमयस्य सहस्रतंतुकपटस्यापा
दतसंभवाहिति प्रागभावसाधकमाहुः॥ तन्न। त्रिचतुरद्ववि जातीयसंयोगे सहस्रतंतु
कपटोत्पादवारणार्थं तावत्तंतुसंयोगानां कारणत्वमवश्यं वाच्यं। तथा च प्रागेव कारणा
विभानाभावात् न चैतत्पटप्रागभावव्याप्यपावत्तंसंयोगानां जनकत्वं वाच्यं। कृति

त्ना:

पयसंयोगानां जनकत्वं वाच्यं ॥ कतिपयसंयोगनाशेपटाशेपयनुत्पत्तिप्रसंगात्। नच तत्तत्पय
व्यवहितपूर्ववृत्तित्वेन विशेषणान्नोक्तदोष इति वाच्यं तत्तदव्यवहितपूर्ववृत्तत्वस्याप्यपावे
त्संयोगत्वेनैव लाघवेनैव हेतुत्वात् ॥ यावत्त्वाविरूढेष्वतत्तद्व्यक्तित्वेनैव हेतुत्वकल्पनात्
नच यावत्समयेक्ता त्रुटिविषयत्वमवच्छेदकं ॥ तथा चैकस्यैव कार्यकारणभावे इति वाच्यं। अपेक्षा
बुद्ध्यावृद्धेच्छैत्रमैत्रीयादिभेदादनंतकार्यकारणभावतादवस्थ्यात् कारणतावच्छेदकगौरव
स्याधिक्याच्च। नच तत्तत्संयोगत्वेन सहस्रतंतुकपटं प्रति कारणत्वेपि द्वित्रितंतुसंयोगे
न खंडपटोत्पत्तौ कथमग्रहस्रतंतुकपटोत्पत्तिस्तत्पटस्य तत्प्रतिबंधकत्वादिति वाच्यं।
द्वितंतुमिश्रताद्समवायिनाशेन तन्नाशादेव सहस्रतंतुकपटस्य सहस्रतंतुकपटेतत्रेःप
द्वामता पटध्वंसस्य खंडपटोत्पत्तौ हेतुत्वाच्च द्वितंतुमाद्समवायिकारणात्। पूर्वखंडपटना राम
नत्पधमस्व। अपरे तु सहस्रतंतुपटस्य समवायिनी तत्तौ न तत्तंतूनां तत्संयोगानां हेतु

तासंभवति। तंत्वंतरे घटसमवाये न सत्वे न व्यभिचारात्। अनेन कार्यकारणभावेन गौरवाच्चात्र
तएव तत्तच्चंतो समवायस्य भिन्नत्वस्यांगीकारेपि न निस्तारः समवायेन तत्पटकारणतयाप्राग
न च कतिपयसंयोगे पुसत्सु सहस्वतंतुपटोत्पत्तिः कालिकसंबंधेन तत्पटोत्पत्तौ लि
कसंबंधेन चरसंयोगव्यक्तेः स्वतंतुत्वेन हेतुत्वात्। न च सहस्रतंतुमात्र हत्तिबहुत्वव्यक्तेः स्वव्या
प्तित्वेन समवायेन हेतुतास्त्विति वाच्यं।। तत्पटाव्यवहितपूर्वसमयेतद्बहुत्वव्यक्तेरभावात्। चैत्रमै
त्रीयादेस्स्यातुच्छ्यादिनाविनिगमनाविरहात् – – ---- प्रागभावेसिद्धितस्याभावत्वंतु
भावत्वसाधकमानाभावात्। न चाभावत्वसाधकमानाभावात्तभावत्वं तस्य समवायेनैधं
सप्रतियोगिनं प्रतिद्वव्यस्यकारणत्वेनादित्वासिद्धेरिति वदंति। तन्न। समवायतत्स्वरूपे
णात्कारणतेयप्सतेः किंच। तथात कालिकसंबंधेन चरमसंयोगव्यक्तेस्तदानीमतं
तोत्पन्नानां वा प्रत्येकं हेतुत्वे विनिगमकाभावात्। अनेन कार्यकारणभावापत्तेः समवायेना

२४

न्या त्वप्रसक्तेः तत्र द्रव्यत्वादिजातिसमवायेन कार्यतादात्म्येन तत्तद्द्रव्याणां हेतुत्वस्यावश्यकत्वेन तेनैवान्नीतप्रसंगसंभवात्
किं च तत्तद्व्यक्तित्वस्य कार्यतानवच्छेदकत्वे नायादृतासंभवः तस्य समवायेताकस्मिकत्वपरिहा
रार्थं कार्यतावच्छेदकत्वस्वीकारेपि तत्पटत्वत्वेन तन्तूनामेव तादात्म्येन कारणत्वसंभवात् कार
णतावच्छेदकावलिरस्यैवच्छाप्रकृते कार्योत्पत्तौ नियामकत्वात्। एवं जागराद्यज्ञानस्य चतु
र्थक्षणोत्पत्त्यापत्तिस्तत्कारणस्य पूर्वसत्वात् तज्ज्ञानरूपप्रतिबंधकाभावस्य च तत्तृतीयक्षणसत्वात्
अत एव नहि तायत्तृतीयक्षणायोस्तद्यादृजेतत्क्षणोत्पन्नातेतानां प्रतिबंधकत्वे प्रत्येकं वि
निगमनाविरहादतिरिक्तप्रागभावसिद्धिरपि निरस्ता॥ द्वितीयज्ञानानामपि चतुर्थक्षणो
त्पादस्यायादृक्संभवेन जागराद्युत्पत्त्यस्यैवैयर्थ्यात् न च द्वितीयादिज्ञाने पूर्वपूर्वज्ञानस्य
कारणत्वात् तज्ज्ञानस्यैवोत्पन्नो प्रतिबंधकत्वात् नायादृक्न मिति वाच्यं तत्तज्ज्ञानपूर्वकालो राम
त्पत्तेः प्रत्येकं विनिगमनाविरहात्। अतिरिक्तकारणत्वेन प्रागभावसिद्धेर्वक्ष्यते

नकार्यविशेषोपादानायासैवैयर्थ्यात्। न च हि तंतुकपटसंयोगस्य समवायेन तत्र दोषत्वेन कारणत्वसं

भवात् न प्रागभावसिद्धिरिति वाच्यं॥ संयोगस्य वैजात्येनान्यइकत्वावच्छिन्नं प्रतिपटत्वावच्छिन्नं प्र

ति वा जनकत्वे तेन तत्पटत्वावच्छिन्नं तस्य कारणत्वप्रत्येकं तेस्तेर्विनिगमनाविरहे दुर्वारः तच्चतन्मा

त्यतः क्लृप्तकारणास्यैव विशिष्यहेतुतेति वाच्यं तादृशनियमे मानाभावात् अतएव तत्त्वज्ञानप्रागभा

वो दृष्टहेतुतयासिध्यतीति निरस्तं। तत्त्वज्ञानात्तरप्रागभावस्य सत्त्वेन तत्त्वज्ञानिनोऽप्यदृष्टापत्तेः। आ

द्यतत्त्वज्ञानप्रागभावस्य च हेतुत्वे आद्यत्वानिरुक्तेः वैजात्यमेवाद्यत्वं तथा चाद्यज्ञानप्रागभावस्य

हेतुत्वेऽपि निरस्तं॥ लाघवेन वासनाया हेतुत्वसंभवात्। तत्त्वज्ञानध्वंसस्य प्रतिबंधकत्वादज्ञान

चेत्तत्त्वज्ञानोत्पत्तिक्षणात्तदुत्तरक्षणोध्वंसप्रतियोगिनि तत्पूर्वक्षणोत्पन्नध्वंसप्रतियोगिनि रागोत्प

पित्स्वीकारात्॥ किंचाद्यतत्त्वज्ञाने वैजात्यस्वीकारापेक्षया तत्क्षणोत्पन्नध्वंसप्रतियोगि

नि तत्पूर्वक्षणोत्पन्नध्वंसप्रतियोगिनि वा वैजात्यस्वीकारस्यैवोचितत्वादिति दिक्। के

न्या॰ विनुतत्पूर्वत्वप्रतीतेर्लाघवेन तत्प्रागभावस्यैव विषयत्वं कल्प्यते नत्वनेकानां ध्वंसाभावप्रतीतौ तावेक
स्य विषयत्वं न तावता अधिकरणानां च तत्पूर्वत्वहानिः तत्प्रागभावस्य संबंधाभावात्। कथं तत् ता३
त्पूर्वप्रतीतिरिति वाच्यं ध्वंसप्रतियोगिमात्रस्य कालत्वेनाभ्युपगमात् नन्वेवं कृतिसाध्यत्वज्ञान
प्रवृत्तौ साक्षात्॥ चिकीर्षाद्वारा वा हेतुत्वं यद्यपि सिद्धे कपालादौ प्रवृत्तेस्तु कृतिसाध्यताज्ञानाभा
वात् कथं हेतुत्वमिति चेन्न उक्तो द्विविधा विषयता सिद्धताख्या उद्देश्यताख्या च तत्र सिद्धताख्या
विषयतया कपालादौ कृतिसाध्यताज्ञाने हेतु किन्तु उद्देश्यताख्याविषयतया तथा
च कुम्भवान् भवेयमिति घटाद्युद्देश्यकप्रवृत्तौ घटः कृतिसाध्य इति ज्ञानं घटसाधनत्वेन तदुद्देशप्रवृ
त्तौ घटेऽपायसम्भवान्न तद्धेतुरतः कपालादिज्ञानाद्यभावकाले न घटोद्देश्यकाप्रवृत्तिरिति
केचित् परे तु घटोद्देश्यकप्रवृत्तिः सिद्धताख्याविषयतासंबंधेन घटे न यत्नकृति हेतुक राम
पालेघटत्व —————— देशाविरहदशायां कपाले तादृशज्ञानात् प्र

वत्त्वापत्तिरिति वाच्यं घटवत्त्वेन कपाले त्वदिष्टसाधनताज्ञानात् इ घटवत्त्वेन कपालेच्छायाः आपादितत्वे हे
त्वात् समवायेन तादृशप्रवृत्तौ समवायेन घटेच्छायां घटसाधनताज्ञानस्यापि तत्त्वे हेतुत्वादित्याहुः अपरे
तु सिद्धताख्याविषयतया घटोद्देश्यकप्रवृत्तौ घटवत्कपालं भवत्विति इच्छा कृतिसाध्यघटसाघटसाधन
मिति धीः प्रतिप्रवृत्तिं च हेतुरित्याहुः प्रवृत्तौ तु घटत्वावच्छिन्नोद्देश्यताख्याविषयतासंबंधेन प्रवृत्तौ घटत्वाव
च्छिन्नविशेष्यतासंबंधेन चिकीर्षा घटसाधनमित्युपादानप्रत्यक्षं घटत्वावच्छिन्नप्रकारतासंबंधेन
हेतुः कृतिसाध्यताज्ञानस्य साक्षात्प्रवृत्तिहेतुत्वे तु तादृशप्रवृत्तौ घटत्वावच्छिन्नविशेष्यतासंबंधे
न कृतिसाध्यताज्ञानमिच्छा च हेतुः तादृशप्रत्यक्षं च तादृशप्रकारतयेत्याहुः नव्यास्तु कृतिसाध्य
साध्यताज्ञानं प्रवर्तकं। बलवदनिष्टाननुबंधित्वाज्ञानं तु कथं। अत्र केचित्। कृतिसाध्यता
ज्ञानवत् साक्षात्प्रवर्तकमिति वदंति। उपादेयत्वादिष्टसाधनताज्ञानवदित्यपरे इष्टं तु कोपाकृन्मिनु
किं बलवदनिष्टाननुबंधित्वं। इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं तदिति

व्याः

चेत्॥ नांतरीयकत्वानिर्वचनात् न च कालिकसंबंधेन स्वजन्यसुखव्यापकत्वं तत् सुखदुःखयो
रसमानकालीनत्वनयाकादिदुःखस्यापि सुखनांतरीयकत्वापत्त्यात् तेप्रहत्तेभावापत्ते तादृग्दैशि
केन व्यापकत्वं तत् नरकदुःखस्यापि दैशिकेनागमनजन्यसुखव्यापकतया नांतरीयकत्वेन तत्र
प्रवृत्त्यापत्तेः। न च स्वजन्येष्टसाधनत्वे सति तत्त्वं तत्। निदाघदूनदेहस्य निकटस्थसरोवगाहन
वत् दूरस्थसरोवगाहनेपि प्रवृत्त्यापत्ते न च स्वेहेश्यकसुखोत्पत्तौ पदवश्यंभावितं निदाघदून
देहस्य संतापशांतेर्निकटस्थसरोवगाहनेन संभवात् दूरस्थसरोवगाहनजन्यदुःखस्य नाव
श्यकत्वमिति न तत्र प्रवृत्तिरिति वाच्यं॥ परस्त्रीगमनेपि प्रवृत्त्यापत्ते। न च यज्जातीयेष्टतावच्छे
दकावच्छिन्नोत्पत्तौ यदावश्यकं तत्त्वं। फले जन्मसुखो प्रवृत्त्यापत्ते। जज्जातीयसुखोत्पत्ता
ववश्यं न च यदुःखं विलोहेश्यकसुखानुत्पत्तिस्तन्नांतरीयकं। यद्वा यागस्य साध्यत्वेमुज राम
नके प्रवृत्त्यापत्तेः। न च विजातीयद्वेषे स्त्रीयत्वविशेषणोमान्यपि च निस्तारः यागाहावत्र

हृच्यापत्तेः॥ तद्दुःखस्यापि कस्यविद्धितिप्रद्वेषविषयत्वात्॥ अत एव विजातीयद्वेषेणैव प्रत्यक्षेशेषशोनापि
न निरस्तालितत्वेन ताहृशद्वेषस्य विशेषणीयत्वेन गौरवमः यज्ञात्तु रूद्धेषस्य जात्या ताहृशो द्वेषस्तद्दाय
दाप्रवृत्त्यभावापत्तेः॥ तच्चैतत्कालावच्छेदेन तद्रूपापद्वेषविषयत्वाभाववत्तया वत्स्वजन्यकत्वज्ञानं तत्तु
षीयप्रवृत्तौ हेतुरिति वाच्यं। द्वेषज्ञानस्याप्रतिबंधकत्वादिति चेत्। अत्र केचित्। पाकादिप्रवृत्तौ पाकज
न्यत्वेनोपस्थिते बलवद्द्वेषस्य प्रतिबंधकत्वात्। अन्ये तु पाकजन्यतत्तत्फले द्वेषस्तत्फलसाधनताज्ञा
नस्य प्रवृत्तौ प्रतिबंधकत्वे। परे तु विशेष्यतया प्रवृत्तौ विशेष्यतयोत्कटद्वेषः प्रतिबंधकः स चोत्कटद्वेष
विषयसाधनताज्ञानात्। न चोत्तद्वेषस्योपायप्रवृत्तौ। न विरोधित्वमुपायप्रवृत्तिजनकोपायेच्छाका
ले तस्यासत्वात् आत्मयोग्यविशेषगुणानां क्षणिकत्वनियमेनोपायेच्छाद्वेषसामग्र्योरव्यवहित
पौर्वापर्यस्यैकक्षणावृत्तित्वस्य वा भावादिति वाच्यं। ज्ञानयोरेवयोगपद्यानंगीकारेणायत्नज
न्यागमनजन्यस्यस्वहेतुः स्वयोर्युगपद्द्वेच्छाद्वेषोत्पत्ते इच्छाद्वेषविषययोर्युगपद्द्वेसाधनता

सा॰ ज्ञानेनत्रपापेद्वेषः नत्विछातत्तादृद्वेषाभावस्यकार्यसहभावे नोपायेछापि घटनद्धारैवतस्य प्रवृत्तौप्रतिबं
धेत्वस्वीकारात्॥ यद्यप्यत्रस्थलेत्रपापद्वेषोत्पत्तिकालेतत्रैकाप्युत्पद्यतेततस्तुनप्रवृत्तिः उत्कटद्वेषस्यप्र
वृत्तौसाक्षात्प्रतिबंधकत्वात्। योग्यात्मविशेषगुणसामान्यस्यायोगपद्यानंगीकारेतु यत्रागम्यागमनफ
लेछाततोगम्यागमनेफलसाधनताज्ञानेदुःखसाधनज्ञानेचततोगम्यागमनेछाततत्तामप्याव
वत्वान्नदुःखद्वेषः ततोदुःखद्वेषः तस्यस्वाश्रयजनकत्वज्ञानसंबंधेनागम्यागमनप्रवृत्तौप्रतिबंधक
त्वात्कार्यसहभावेनप्रवृत्तौतद्भावस्यकारणत्वात्तदुत्पत्तिकालेचनागम्यागमनेप्रवृत्तिरिति। तच्च।
तेनसंबंधेनोभयत्रकालेद्वेषाभावेनप्रवृत्तेर्वारणात्द्वेषस्यप्रतिबंधकत्वमप्यमिति॥ तादृशज्ञानस्या
पेक्षाबुद्धिरूपत्वेतुतस्यप्रतिबंधकत्वमित्यपरे। उत्कटद्वेषनत्वा समवायिकारणनाशस्यतत्र—
ऋकारणाभवेत्किंतुप्रतियोगितासंबंधेन
हन्यनाशत्वावछिन्नेः स्वप्रतियोगसमवायिसवेतत्वसंबंधेनस्वप्रतियोगियोऽन्यत्वसंबंध राम

त्वाफलोपहितजन्यताधीःकारणतावछेदकसंबंधेनि —————————— कारणना
शात्तु महापटनाशस्तदनंतरंखंडपटोत्पत्तिस्तु महापटनाकत्र्यसंभवाद्कारणांसंयोगना
शाप्रतियोगिसंयोगस्यखंडपटोत्पत्तिस्तखंडपटप्रतिस्वरूपयोग्यत्वेनखंडपटस्यस्वरिणक
त्वापत्तिरपिरस्ताः विभागेद्रव्यनाशजनकतावछेदककोटिप्रविष्टतयाजातिकल्पनेगौ
रवं न चासमवायिकारणनाशकान्येघटेत्र्यनेत संयोगादिकत्र्यनायेत्र याविभागेद्रव्यनाश
कारणतावछेदककोटिप्रविष्टतयाजातिकल्पनैवलघीयसीतिवाच्यं स्वराणस्यातींद्रियत्वेनासम
वायिकारणनाशपूर्वक्षणेसंयोगादिकारणसत्वेप्रमाणाभावात् किंच अस्तुवाविभागेवैजाति
तथापितंतुद्वयविभागात् महापटनाशस्यसकलतंतुसुज्ञायमानत्वेनविशेषणतासंबंधेन
द्रव्यनाशेसमवायसंबंधेनविभागस्यनहेतुः नापिस्वनाशपसंयोगजन्यसंनधेनगौरवातिदे

राम त्रत्रोच्यते: स्वसमवायिसमवेतत्वसंबंधेनविजातिविभागस्यैवनाशकत्वात् वचकयान्नभूतत्व
विभागात्घटनाशापत्तिनचविभागेवैजात्यकल्पनमेवगौरवमितिवाच्यंस्वप्रतियोगिकन्येपहित
जन्यत्वस्यसंबंधत्वकल्पनापेक्षयाजातिकल्पनैवलघीयसीतिकश्चित् वस्तुतस्तु यत्रक्रिया
ल्पादीनांनाशात्घटनाशस्तत्रविभागस्यासंभवित्वेनघटनानुपपत्ते तस्मादयमभिप्रायः पूर्वसम
वायिकारणा; समवायिकारणनाशयोर्हेतुत्वमुक्तं इहाविय न समवायिकारणनाशनाश्य
द्रव्यनाशे, समवायिकारणनाशयोर्हेतुत्वमुक्तंस्यहेतुत्वंतत्रासमवायिकारणनाशस्यकवि
भागस्यैवहेतुत्वमुक्तमितिदिक् वस्तुतविभागेवैजात्यकल्पनापेक्षया: समवायिकारणनाशक
विभागस्यैवहेतुत्वमुमितिदिक् ·कारणनाशस्यकारणत्वतन्त्रव्योपेक्षयाच: विज्ञाविध्रस
यागनाश स्वप्रतियोगिकन्योपहितजन्यत्वसंबंधेन: प्रतियोगितासंबंधेन द्रव्यनाशेहेतु राम
रस्तितिवाच्यं परमाणोःपूर्वपूर्वघटाजनकसंयोगनाशस्यसर्वदाविद्यमानत्वात्तस्यको

त्र्यणुकादौ स्वप्रतियोगिसमवायिसमवेतत्वसंबंधेन सत्त्वात्सर्वेषां द्व्यणुकानामौपाधिकत्वप्र
ते - - - - - - - - - - - - - योगिसमवायिसमवेतत्व स्वप्रतियोगिकालिकविशेषणतात्यत
तदुभयसंबंधेन - - - - - - - - - - - स्त्विति वाच्यं यथा घटनाशोत्पत्तिद्वितीयक्षणे घटसमवे
त गुणानां प्रत्यक्षं नापत्तिक्रियते चक्षुःसंयुक्तसमवायमध्यानिविष्टचक्षुःसंयुक्तघटस्या
भावेन तद्घटितसन्निकर्षाभावात् तथा स्वप्रतियोगिसमवायिसमवेतत्वमध्यनिविष्टस्वप्र
योगिसमवायिनोऽभावेन तद्घटितसंबंधाभावात् कपालादिनोनाशाज्जातोयं कपाल
कपालादिसंयोगनाशस्तस्माद्घटादिनाशो न स्यात् न च स्वप्रतियोगिनोऽभावेन स्वप्र
तियोगिजन्यत्वसंबंधेपि तुल्यो दोष इति वाच्यं स्वप्रतियोगिजन्यत्वशब्देन जन्यत्ववि
शेषस्यैवोपस्थापनात् [illegible]फलोपहितजन्यतानां नानात्वेन कथमेकः संबंध इति

राम

वा[illegible]च्यसंबंधाननुगमस्योक्तदोषत्वात् नचफलोपहितजन्यतोच्यतेनानाश्रसातानांनात्वेनरूप्यत्वे
मान्याभावाहिंसाकारणतानस्यादितिदिग्भिर्विभावनियमितिदिक्॥ शोधयन्त्वाशिशाविकासत्वेहे
तोव्यभिचारस्यापारांगदर्शसंबंधस्वाशोगोयोरोमासंबंधः तत्रत्रयागामूलत्त्वपूर्वोचीशितातेजोन्य
मेकमपूर्वमेवंचत्वारस्यानुत्तरेष्टाकार्येप्रतित्वत्तरेष्टायाश्चनुत्तरदेहेषुकार्येप्रतिबंध
त्वावधिन्नेत्वननुगमेतमेवकारणं॥ अतएकस्यकालभेदेनप्रवृत्तिनिवृत्तीत्यपरीति
तिदिक्। आचार्यास्तुस्तुर्याः उक्तयोर्हिंसादोषार्थेनाश्रोशंसालिङः भिघावाचकत्वा
दिधिलिङोप्याप्राभिप्रायोवाच्यः तथाचयागाहावाप्राभिप्रायविषयत्वेनातेयागोमदि
ष्टसाधनंममाप्राभिप्रायविषयत्वात्॥ मान्याचायाभिवावारिवपाइष्टसाधचत्वे राम
नाप्राभिप्रायविषयत्वेतुबोध्य॥ तस्मचविधिनानोनादिष्टसाधनत्वेनाप्राभिप्राय

यर्योविध्यर्थौवाच्यौ। तदुभयस्याप्येष्टसाधनत्वमेवविध्यर्थोस्त्विति चेन्न अस्ति इष्टसाधनत्वादि
के विध्यर्थः तथापि कालांतरभावि स्वर्गसाधनत्वं दर्शपौर्णमासयोः कथं आशुतरविनाशि
त्वादिति चेत्। न। अपूर्वस्य द्वारस्य स्वीकारात्। अत्र षट्प्रधानयागाः उत्पत्तिविधिना अवांतरका
लयोगिनस्त्रयस्त्रयोयागादर्शसंबंधस्त्रयोयागाःपौर्णमासंबंधः तत्रतत्त्रययागामुत्पत्त्यपूर्वाणित्री
णि तैर्जन्यमेकमपूर्वमेवं चत्वारि संबंधि कांतरेपीष्टौ॥ कलिकापूर्वाभ्यामेकं पूर्वं जन्यते
तत्परमापूर्वमिति जन्मापूर्वजनकापूर्वेनाशाभ्युपगमात्तन्नवापूर्वपक्षमाहुः अन्येतु परमा
पूर्वकलिपूर्वयोरभावान्नाभावेन षड्वापूर्वाणि। नचांगानां प्रधानोत्पत्त्यनंतराचापूर्वद्वाराफ
लहेतुत्वेंगप्रधानयोः साम्येन सर्वेषां प्रधानत्वापत्तिरितिति वाच्यं। त्वन्मतेपि अंगापूर्वाणां प्र
धानोत्पत्त्यपूर्वाणां च कलिकापूर्वं वेहेतुत्वेन दोषतौल्यात्। अंगापूर्वं विशिष्टप्रधाना
पूर्वाणामेव कलिकापूर्वहेतुत्वान्नोक्तदोष इति चेत्तन्मतेपि। अंगापूर्वं विशिष्ट

राम:

प्रधानापूर्वाणामेव फलहेतुत्वाल्लोके ऽतत्तत्कल्पिकापूर्वानभ्युपगमे प्रयाजजन्यापूर्वस्य नाशात्प्रधा
नजनापूर्वेनरनुष्ठानंनस्यादिति चेन्न॥ प्रयाजादितामाहत्तैमाजोत्तरमस्ति चेत्तत्तदुत्पत्तिकालिनप्रजन्मा
पूर्वविशिष्टस्य प्रधानापूर्वस्य फलकारणत्वस्वीकारे ऽणात्तदनुष्ठानोपपत्तेरिति कृ: ननु चरम
कारणातिरिक्तकारणासाधारणस्य कार्याव्यवहितपूर्ववृत्तित्वव्यापकस्य व्यापारात्यतरसत्त्व
रूपस्य योगे ऽपि न तस्य निर्वाहार्थमपूर्वस्य व्यापारस्य कल्पनास्तवे च क्रियाध्वंसस्य स्तु लाघवा
न्न त्वे हृष्टे गौरवात्॥ नैव प्रतियोगिध्वंसयोरेकत्राजनकत्वान्नध्वंसस्य व्यापारत्वेतिवाच्यं
तादृशनियमे मानाभावादिति चेन्न॥ अपूर्वाभावे पापध्वंसरूपफलभोगे च न प्रायश्चित्तवै
यर्थ्यापत्तेर्न च प्रायश्चित्तध्वंसस्य नरकप्रतिबंधकत्वमितिवाच्यं॥ प्रायश्चित्तोत्तरकृता
तत्कर्मणो नरकाभावप्रसंगात्॥ न च प्रायश्चित्तप्राक्काले न च प्रायश्चित्तध्वंसस्य राम
नरकप्रतिबंधकत्वमिनवकर्मजन्यदुःखस्य विरोधीतिधीतिवाच्यं॥ रजजन्महातपा

यतनाशकप्रायश्चित्तध्वंसाजन्यांतरमिति विशेष्यकर्मद्वः स्वस्वप्रतिबंधायत्ते॥ एतज्जन्यफलतनाहशक
मजन्यद्वः स्वचतावेरोधित्वेच अप्रसिद्धेः किंचतत्त्वज्ञानस्यापूर्वनाशकत्वेन वासनाध्वंसद्वारा
पूर्वप्रतिबंधकत्वेन वापूर्वसिद्धिः॥ न च वासनाकालिनया गतत्वेन हेतुत्वाल्लोक दोषः गौरवा
त्॥ एवं कर्मनाशाजलस्पर्शात्करतोयाविलंघनात्॥ गंडकीबाहुतरणाद्धर्मः क्षरति कीर्तना
दित्यादिवचनात्कीर्तनादिनाश्यतयापि धर्मसिद्धिरीश्वरे। विस्तरस्तत्त्वस्मृत्युक्तगुणाद्यस्यादि
पर्यायावसेयः। सचेत्थं। नचध्वंसस्यानित्यत्वेन फलानेत्तापत्तिः॥ तन्मतेपि सूत्रस्यधर्मनाशक
त्वप्रथमोत्पन्नसूत्रत्वेन धर्मनाशे ग्रेशत्वचर्षभाविस्वर्गारूप्यफलाभावापत्तिः चरमसूत्रस्यविजा
तीयसुखस्यवाधर्मनाशकत्वान्नतादृशस्वर्गानुत्पत्तिरिति वाच्यं। अपूर्वेत्यागभावेध्वंसा
सानामपूर्वप्रतिकर्मेरागः अपूर्वस्यचध्वंसेकारणात्वस्यावकल्पतायेस्पयालाघवेन चरम
सूत्रोत्पत्तिप्रागोत्पत्तित्वनिचयध्वंसत्तद्याप्तित्वेनविजातीयसूत्रध्वंसस्यवात्तत्वेतत्र

राम

तत्तद्ध्वंसस्य प्रतिबंधकत्वेऽपि ज्योतिष्टोमांतरजन्यस्वर्गो न स्यात्। अस्मन्मते विजातीयस्वर्ग
स्य प्रत्ययेन ज्योतिष्टोमजन्यधर्मे विजातीयधर्मस्य नाशकत्वान्नायमेतादृशस्वर्गानुपपत्ति
रिति वाच्यं। येन ज्योतिष्टोमद्वयं कृतं तस्यैकस्यैकज्योतिष्टोमफलत्वेन कर्मांतरभोगोत्तरं ज्यो
तिष्टोमजन्यगौणस्याद्विजातीयस्वर्गेणाज्योतिष्टोमजस्यादृष्टस्य नाशात् तत्र ज्योतिष्टोमज
न्यधर्मे तत्तद्धर्मे चातत्र ज्योतिष्टोमजन्यविजातीयस्वर्गस्य तत्तत्स्वर्गं प्रति बंधकत्वादि
त्येके। परे तु अनंतकार्यकारणभावकल्पनागौरवभयेन ज्योतिष्टोमजत्वापूर्वस्य विजा
तीयापूर्वस्य वा विजातीयस्वर्गनाश्यत्वात् ज्योतिष्टोमद्वयजन्यस्वर्गयोर्व्यवधानेनै
वैचोत्पत्तिः कल्प्यते। वैजात्यस्य तत्फलत्वे न चरमस्वर्गे विकाराद्यदृष्टे वाऽदृष्ट
नाशः भवन्मते तत्तत्प्रतिबध्यप्रतिबंध इति वाच्यं। कलंजभक्षणोत्तरजन्यफल
स्याभावापत्तेः। प्रायश्चित्तत्तद्ध्वंसस्य प्रतिबंधकस्य विद्यमानत्वात्। तत्कलंजभक्ष

भक्षणजन्यफले प्रतिबंधकत्वं त्वप्रसिद्ध्या न भवति। अस्मते प्रायश्चित्तस्य पापनाशत्वात पूर्वकलंभ
क्षणजन्यपापस्य प्रायश्चित्तेनाशेपि कलंजभक्षणोत्तरजन्यसत्त्वान्यफलानुपपत्तिरित्याहुः के
चित्तु अपूर्वाभावे ध्वंसद्वाराप्रधानानामंगानां फलकारणत्वाविशेषात्तस्य प्रधान्यापत्तिरित्याहु
स्तन्न। अंगध्वंसविशिष्टस्यैव ससंबंधेन प्रधानस्यैव कारणत्वस्वीकारात्। आगमस्यैव निगम
कत्वान्नैव परित्वं अन्यथांगापूर्वविशिष्टप्रधानापूर्वे परमापूर्वं जनयति प्रधानापूर्वविशिष्ट
मंगापूर्वं वेत्यत्राविनिगमकाभाव इति प्राहुः। न तुल्यवाधथा पूर्वकत्वं नेतहात्वेहु याश्रा
द्धाहैकस्वेनिष्ठमेकमेव कल्प्यानां पुरुषनिष्ठातेका हकत्स्य नायां गौरवादिति चेत्। ननु
लाघवादपूर्वक अमुंताश्चाहे तमुक्तस्वर्गत्वादापत्ते मुक्तपुत्रयुक्तपुत्रहृततद्व
तद्वाटसाध्यहिजनितपायेनरकादिसंशयात्। शंका मोक्षेकोपि न प्रवर्तेत। अपिचा

इष्टसकर्तृनिष्ठत्वेपित्वगतरमफलस्यपरंपरयोनाशजनकत्वेगौरवं॥ मोक्षनिष्ठत्वेसमवायेननाशक
त्वेलाघवादितिदिक्॥ ननुविधेरिष्टसाधनत्वेशक्तिः स्वर्गादिसाधनत्वेवा॥ नाद्यः स्वर्गादिसाधनत्वे
नप्रवर्त्तकज्ञानस्यानुपपादकत्वात्॥ नांत्यः॥ अनंतशक्तिकल्पनापत्तेरितिचेत्॥ अत्रकेचित्॥ बुद्धि
स्थत्वविशिष्टकार्यत्वोपस्थापकपदसमभिव्याहारादितिकल्पयंति नाद्यव्युत्पत्तिविरोधः यत्रघटादिपदज्ञाना
नांत्रस्तुकार्यत्वविषयकघटादिशाब्दत्वेकार्यतावच्छेदकत्वग्रहस्तत्राप्यग्रेलाघवेनघटादिशाब्द
त्वेघटादिपदज्ञानानांकार्यत्वविषयकशाब्दत्वेकार्यत्वेतत्पदज्ञानानांकार्यतावच्छेदकंकल्पयति॥ नचप्र
थमपदत्तेवलवदिष्टेतरजत्वमितिप्रथमपदतत्त्वस्यापिनेदंतरजत्वमित्यनेनैवाद्धितिसिद्धमपेक्षाज्ञानामपि
प्रामाण्यमितिदिक्॥ ननुतत्तत्कार्यत्वबोधेतत्तत्पदज्ञानस्यहेतुत्वात्घटमानयेत्यादावव
यशाब्दबोधात्घटादिपदानामन्वयेपिशक्तिरावश्यकीतिचेत्ः निरूपकत्वादिसंबंधेनघ
टप्रकारककर्मत्वादिविशेष्यकबोधेघटादिपदोत्तरद्वितीयात्वेनद्वितीयादिज्ञानस्यहेतुत्वा॥

विषयत्वेन स्वर्गादेरनुगमादिष्टाविषयसाधन स्वर्गादिसाधनत्वे सुशक्तिर्बुद्धिस्थत्ववदिष्टविषयत्वमोक्षात् स्वर्गसाधनत्वादिप्रकारको बोधः परे तु लिङादेर्नीतार्थकत्वमिष्टमेवेति स्वर्गादिसाधनत्वे सुशक्तिः॥ स्वकामादिपदस्य स्वर्गसाधनत्वे तात्पर्यग्राहकत्वात्॥ स्वर्गकामेत्यादौ न फलांतरसाधनत्वबोधः न चाविश्वजिता यजेतेत्यत्र स्वर्गकामपदाभावात्कथं स्वर्गसाधनत्वबोधः॥ तत्रापि न्यायेन स्वर्गसाधनत्वे तात्पर्यग्रहात्। न च प्रतितिष्ठंतीत्यादौ न्यायेन स्वर्गसाधनत्वे तात्पर्यग्रहे स्वर्गसाधनबोधापत्तिरिति वाच्यं। तत्रार्थवादेन फलोपस्थितौ तादृशन्यायाभावेनार्थवादोपस्थितफलसाधनत्वे तात्पर्यग्रहादित्याहुः नन्वर्थवाज्ञानो न बोधकत्वं कार्यान्विते पदानां शक्तेः। तथाहि प्रयोजकवृद्धशब्दानंतरं प्रयोज्यवृद्धप्रवृत्तिमुपलभमानो बालः तत्रापि जनकतया कार्यताविशिष्टज्ञानमनुमिनोति स्वप्रवृत्तौ कार्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणात्। ततस्तद्धेत्वाकांक्षायामुपस्थितत्वाच्छाब्दमेव तथावधारयति॥ ततस्तान्निवीहिकांशक्ति

राम कार्यान्विते शब्दत्वावच्छेदेन कल्पयति तदनु आवापोद्वापाभ्यां घटादिपदे शक्तिग्रहोऽपि प्रथमकल्प
नानुरोधात् कार्यान्वितघटादिविषयो जायते। ननु पदानां कार्यान्वितघटादौ यदि शक्तिस्तदा घटमा
नयेत्यतः कार्यान्वितघटत्वेन कार्यान्वितानयनत्वेन च बोधापत्तिः इह घटवदित्यादिशाब्दबोधा
पत्तिश्च सर्वेषां पदानां कार्यान्वितवाचकत्वादिति चेत्। न। घटादिपदानां कार्यान्वितविषयकघटादि
शाब्दबोधजनकत्वरूपा शक्तिरहितानां। कार्यवाचकपदाभावेन न तत्पदजन्यकार्योपस्थि
तेरभावेन इह घटवदित्यादिना शाब्दबोधाजनकत्वात् न च वस्तुगत्या कार्यान्वितबोधजनकत्व
चेदर्थवादादेरपि बोधकत्वापत्तिः॥ कार्यत्वेन कार्यबोधकत्वं न चेल्लौकिकलिङां तेषां कार्ये
शक्तेरभावादिति वाच्यं। लोकविधेः कार्यत्वे लाक्षणिकत्वेन सर्वेषां कार्यत्वान्वयविषय राम
शाब्दबोधे हेतुत्वान्नपुराणाख्याननाटकादीनामप्रामाण्यमिति चेत्॥ न कार्यान्वयितावच्छेदका

कल्यपतितत्तुत्र्यावापोद्वापाभ्यां घटादिपदे शक्तिग्रहोपि प्रथमकनानुरोधात कार्यान्वितत्वादिविषयो जाय
ते॥ ननु तां कार्यान्विताद्यैर्यदि शक्तिस्तदा घटमानयेत्यतः कार्यान्वितघटत्वेन कार्यान्वितानयनत्वे
नत्वेन च बोधापत्ति॥ गृहे घटं बहित्यादितोपि शाब्दबोधापत्तिश्च सर्वेषां पदानां कार्यान्वितः कार्यान्वि
तवाचकत्वादिति चेत्। न। घटादिपदानां कार्यान्वितविषयकघटादिशाब्दबोधजनकत्वरूपाश
क्ति ग्रहीतातः कार्यवाचकपदाभावे न हि स्वामद जन्यकार्योपस्थितेरभावे न गृहे घट इति शा
ब्दबोधाजनकत्वात्॥ न। चवस्तुगत्या कार्यान्वितबोधजनकत्वे चेदर्थवादादेरपि बोधकत्वा
पत्तिः कार्यत्वेन कार्यबोधकत्वे नेचेल्लौकिकलिङान्तेपां कार्यशक्तेरभावादिति वाच्यं। लौकि
कविधेः कार्यत्वासद्भिशाकत्वेन सर्वेषां कार्यत्वान्वयमपशाब्दबोधे हेतुत्वान्न पुरारा कान्यना
रकादिनां प्रामाण्यमिति चेत्॥ न। कार्यत्ववत्त्वेष्टां गृहेमि स्वर्गकामो यजेतेत्यादौ कार

राम शत्वग्रहवद्विहायघटपदं कार्यान्वितघटज्ञानजनकमिति उत्हि त्वापश्छिह्निः कार्यांशशक्तिं कल्प
यि त्वाघटशाब्दत्वं घटमदज्ञानन्यतावच्छेदकं कार्यत्वाविषयघटज्ञानं तु कार्यत्वोपस्थापक
पदसमभिव्याहाराद्धि इति कल्पयतीति वाच्यं व्युत्पत्तिविरोधात् यद्वा घटदृज्ञानोत्तरं तु कार्यत्वविषय
कघटादिशाब्दत्वे कार्यतावच्छेदकं कल्पयति।। न च प्रथमं ग्रहत्वे वद्भिदंदेर जन्मिति प्रथमग्रहस्यापि तेद्द
जन्मित्वेन बाधोदिति सिद्धमर्थवादानापि प्रामाण्यमिति कूमनुत तत्रापि दोषो बोधे तद्गत पदज्ञानस्य
हेतुत्वात घटमानयेत्यादावन्वयशाब्दबोधात घटादियानमन्वयेपि शक्तिरावश्यकीति चेत
निरूपकत्वादिसंबंधेन घटप्रकारककर्मत्वादिविशेष्यकबोधे घटादिपदहेतुत्वं द्वितीयात्वेन
द्वितीयादिज्ञानस्य हेतुत्वे नैवान्वयबोधसंभवेन तत्र शक्तेरकल्पनात्।। तत्त्वप्रकारक राम

त्वघाद्बोधे तत्तत्प्रकारेण तदुपस्थि संर्धते न रूपेण तन्नहत्त्वपदज्ञानापेक्षेति नान्वयेश
क्तिरितिदिक्॥ अत्र मीमांसकाः लाघवेन घटादिपदानां घटत्वादौ शक्तिस्तथा च घ
टत्वप्रकारकघटशाब्दबोधस्य घटत्वेन घटहत्त्वपदज्ञानाभावेपि जायमानत्वान्नोक्त
रूपेणाहेतुत्वं। न च व्यक्तिबोधाभावापत्तिः॥ घटत्वविशिष्टशक्तिज्ञानस्य घटत्ववि
शिष्टशाब्दत्वं कार्यतावच्छेदकं त्वन्मतेतत्र च मते घटत्वशक्तमिति ग्रज्ञानस्य कार्यता
वच्छेदकं कारणतावच्छेदके लाघवाद्दित्याहुः। तन्न। घटत्वशक्तं घटपदमिति ग्रहता
पेक्षया लाघवेन घटशक्तमिति ग्रहत्वेनैव घटशाब्दबोधे हेतुत्वात्। न च घटत्वेनै
तद्गृहे शक्तिग्रहत घटत्वेनान्यबोधो न स्यात्। न च घटत्वप्रकारकशक्तिग्रहस्य घट
त्वाश्रयशाब्दत्वं कार्यतावच्छेदकमिति वाच्यं। घटत्वेन पटे शक्तिग्रहात्तु घटत्वेन
घटबोधोपत्तेः॥ घटत्वेन पटबोधाभावापत्तेश्चेति वाच्यं॥ समान्यलक्षणाया सर्वेघ

राम

घटे शक्तिग्रहणे समानप्रकारकसमानविशेष्यतया शक्तिग्रहपदार्थस्मरणशाब्दबोधानां कार्य
कारणभावांगीकारात्। शक्तिश्च घटशब्दात् घटत्वविशिष्टो बोद्धव्य इतीश्वरेच्छा: न च तादृशेच्छाया
विषयतया घटत्वस्यैव घटपदशक्तिः स्यादिति वाच्यं। घटत्वविशिष्टेच्छाया घटपदशक्तित्वस्वीका
रात्। आधुनिकचैत्रादिपदेपि चैत्रत्वादिविशिष्टतादृशेच्छाया तादृशेश्वरनियतानाम कुर्यादितत्र
नवाचकत्वरूपनामत्वसिद्धावस्याः शक्तित्वकल्पनात्। तद्भिन्नसंकेतस्तु न शक्तिरिति प्राञ्चः। प
रे तु अस्माच्छब्दादयमर्थो बोद्धव्य इतीच्छैव शक्तिः। तत आधुनिकसंकेतोपि शक्तिः अन्यथा नदीवृ
द्ध्यादिसंज्ञातो विभक्तिर्न स्यात्। अर्थवत्त्वाभावादीश्वरेच्छा शक्तिरिति प्रवादस्तु नादिशब्दादिपदाभिप्रा
येणेति वदन्ति। तन्न। तत्रापीश्वरेच्छासत्त्वात्। नव्यास्तु। नेश्वरेच्छा शक्तिः अपभ्रंशे लाक्षणिके
च तादृशेच्छासत्त्वेन शक्यत्वापत्तेः॥ ईश्वरज्ञानकृतिभ्यामस्माकं संबंध इति सामान्यलक्षणाजन्य
ज्ञानेन च विनिगमनाविरहाच्च तस्यापि घटत्वविशिष्टस्य घटपदशक्तो वक्तुं शक्यत्वात्।
घटत्वोपहिते घटत्वे नेच्छा शैवपर्याच्च। किं तु स्वरूपसंबंधविशेष इति दिक्। केचित्तु ष

च्यत्वे शब्दविषयत्वविशिष्टेच्छाविषयत्वं यतः घटो घटपदवाच्य इत्यादौ घटपदादेर्वाच्यत्वं घटकैकदेश
शब्दो घटपदादेर्भेदेनान्वयात् । घटपदाद्यभिन्नशब्दविषयतात्वविशिष्टेच्छाविषयत्ववानिति बोधः इच्छा
विषयत्वस्य पटादौ सत्त्वेपि तादृशविशिष्टविषयत्वस्य विषयतया विशिष्टेच्छाया वा घटादावभावान्न
घटादौ पटपदवाच्य इति व्यवहारः विशिष्टाधिकरणतायां वाच्यतिरिक्तत्वादित्याहुः । तन्न । घटो घ
गर्यादिपदवाच्य इति व्यवहारस्य साधुत्वापत्तेः । घागर्यादिपदाभिन्नशब्दविषयत्वविशिष्टेच्छायास्ता
दृशेच्छाविषयत्वस्य घटादौ वा सत्त्वात् ॥ किंच इच्छाविषयत्वमेव वाच्यत्वमस्तु । तदेकदेकदेशेच्छायां
घटपदान्वयेन घटपदविषयत्वविशिष्टेच्छाविषयत्वमेस्य घटादेरस्वीकारात् नातिप्रसंगः ज्ञानवि
षयकत्वविशिष्टेच्छाविषयत्वस्य घटेनंगीकारात्त न घटो ज्ञानवाच्येति व्यवहार वस्तुतस्तु तज्ज्ञाने
ज्ञानवाच्यमिति व्यवहारापत्तेः ॥ इदं तु बोध्यं । ज्ञाने इच्छाया इच्छात्वेन विषयतया ज्ञाने सत्त्वेपि ज्ञा
नेविषयक इच्छात्वेन विषयतया ज्ञानसत्त्वेमिस्पति ॥ शक्तिग्रहश्च व्यवहारात् प्रसिद्धार्थपदा
समभिव्याहाराद्विवरणादाप्तवाक्याच्छेषाद् उपमानात् कोशात् । तथा चाहुः श ग्रहं व्याकरणाशज

यमात्कोशात्तुवाक्यव्यवहारतश्च। वाक्यस्यशेषाद्विवृतेर्वदंति सान्निध्यतः। ततः सिद्धपदस्यवृद्धाः। तथा चानु
मानादिव्ययेशाशक्तिग्रहः। व्यवहारादीनां तत्रैवांतर्भावात्। तत्तत्पदशक्तिग्रहस्तु बुद्धिविषयवति बुद्धिवि
षयत्वे घटत्वादीनाम् अनुगमतमेकं तस्यमोषात् घटत्वादिनेव घटादिस्मारणाशाब्दबोधश्चेति कश्चित्
अन्ये तु बुद्धिविषयत्वादिनैव शक्तिः। बुद्धिविषयत्वेनैव शाब्दबोधः। घटधर्मविशिष्टे बुद्धिविषयत्वज्ञाने
तद्धर्मविशिष्टमानयतीत्याहुः। अपरे तु घटत्वादिनैव शक्तिः। बुद्धिविषयत्वेनैस्वाकारात् नानेवशक्तः
यः गुरुत्वधर्मविशिष्टे तुल्यत्वात्। घटधर्मविशिष्टे बुद्धिविषयत्वज्ञाने तद्धर्मविशिष्टं बोधयतीति वदंति। इद
मपदस्यप्रत्यक्षविषयतावच्छेदकावच्छिन्ने। इत्तत्पदस्यसमीपवर्त्तितावच्छेदकावच्छिन्ने। अदः पद
स्यविप्रकृष्टवर्त्तितावच्छेदकावच्छिन्ने सर्वपदस्यपर्याप्तिसंबंधेन बुद्ध्यवच्छिन्ने शक्तिः। सर्वे घटे
षु द्रव्यत्वमित्यत्र च घट इति बुद्धिपर्याप्ते द्रव्यत्वमितिबोधः। सर्वेषु घटेषु रूपमित्यादौ कस्यापि रूपस्य
सर्वघटवृत्तित्वाभावेन सर्वपदस्य व्यापकत्वेलक्षणा। वस्तुतस्तु सर्वशब्दस्य तत्तद्बुद्धिविष
यतापर्याप्ते शक्तिः। सर्वेषु घटेषु रूपमित्यत्रैतादृशबुद्धिपर्याप्तेषु न रूपान्वयः किं तु सर्वेश

द्रसालक्षणायात्तादृशबुद्धिविषयेरूपान्वयः वस्तुतोघटेपुरूपमित्यत्रापिरूपान्वयः किंसुपदस्यजिज्ञासा
विषयत्वविशिष्टे अतः किंपचतीतिवाक्याजिज्ञासाविषयकमेकपाकानुकूलकृतिमानितिबोधः। अत
एवंतुलंपचतीत्यस्यजिज्ञासानिवर्त्तकत्वं। युष्मत्पदस्यतत्कालीनसंबोध्यचैत्रत्वादिविशिष्टेशक्तिः सं
बोध्यत्वंत्वनुगमकंतुशाब्दबोधविषयः अस्मत्पदस्यतत्कालीनाहंपदस्वतंत्रोच्चारयितृचैत्रत्वादिविशि
ष्टेशक्तिः पदादयशरीरावच्छिन्नोहंपदस्वतंत्रोच्चारयितातच्छरीरावच्छिन्नस्याहंपदेनभानं। अतएवव्या
घ्रस्वायामहंवनाप्तरोजेताहेमयदात्तकालिहासादेर्भानं। तेषामहंपदस्वतंत्रोच्चारयितृत्वाभावा
त। नचमैत्रोच्चारितात्त्वंतोहमितिजानातीतिवाक्यान्मैत्रबोधापत्तिः तस्याहंपदस्वतंत्रोच्चार
यितृत्वादितिवाच्यं। अन्यबोधाभिप्रायेणानुच्चारयितृत्वरूपस्वातंत्र्यस्यतत्राभावात
तः नचैत्रस्यापिबोधोनस्याततस्याहंपदस्वतंत्रोच्चारयितृत्वाभावादितिवाच्यं। तत्राहंपदलक्षणा
यातादृशबोधाभावाङ्गीकारात। वयंगच्छामइत्यत्रस्त्वंचाहंचेतिवयमितिलक्षणेवइतिदोषः।।
केचित्तुसीतायाः स्वतंत्रोच्चारयितृत्वाभावेनतस्याबोधाभावापत्त्यानानुवादरूपाहंपदमात्रस्यो

राम: आरोपितत्वावच्छेदकावच्छिन्नबोधकत्वं। अनुवादरूपाहंपदे तु यस्य पस्य बोधोनुभवसिद्धः तत्तद्व्यक्तित्वे
न तत्तद्बोधकत्वमन्यबोधाभिप्रायेणोच्चारयितृत्वमनुवादकत्वमिति दिक्॥ स्वतंत्रोच्चारयितृत्वेन ज्ञातबो
धकत्वमहंपदे सीतायास्तु तदभावाद्बोध इति मिश्रानुयायिनः॥ लक्षणा च न शक्यादशक्योपस्थिति:
उपस्थितिप्रयोजिका हि लक्षणा न तु सैव: अतएवाशक्ये तात्पर्यमपि लक्षणा न। तात्पर्यनिर्वाहिका
हि लक्षणा न तु तात्पर्यमित्येके वा। अलक्षणायाअपि लक्षणात्वे शक्तेरपि तत्वापत्तेः अन्वये तात्पर्यस्या
पि लक्षणात्वापत्तेश्च किंतु स्वशक्यसंबंध॥ सा च द्विविधा॥ गौणी तद्भिन्ना च तत्र सादृश्यात्मकः श
क्यसंबंधो गौणी। यथा राज्ञि इरषिशब्दस्य तद्भिन्ना च तीरादौ गंगापदस्य। अंजना च न वृत्त्यंतरं गद्या
गघसीदौ गमनाभावे तात्पर्यान्यथानुपपत्त्या कस्यचित्तद्दस्यलक्षणायैव बोधसंभवात्। अन्येषांय
पदानां तात्पर्यग्राहकत्वात्। न च सत्यपि बाधग्रहे कचिद्दर्थविशेषाणां प्रतीतिरस्त। सा च न लक्ष
णायालाक्षणिकेबाधस्य विरोधित्वात्। प्रतिवध्यतावच्छेदके दोषविशेषाजन्यत्वतत्वे जनाज राम
न्यत्वस्यादिहानादिति वाच्यं। वृत्तिविशेषाजन्यत्वस्यैव प्रतिवध्यतावच्छेदके निवेशात् किंव

त्वं तरेणेति दिक्॥ सा च लक्षणा द्विविधा। जहत्स्वार्थाः जहत्स्वार्था च। यत्र स्वार्थस्य न भानं तत्र जह
त्स्वार्था। यथा गंगापदस्य तीरत्वेन लक्षणा जहत्स्वार्था। गंगातिरत्वेन लक्षणाऽजहत्स्वार्था॥ का
कपदस्य दध्युपघातकत्वेन लक्षणाप्यजहत्स्वार्था स्वभानात्। अत्र जहत्स्वार्थैव। घटो गुणवान्
इत्यत्र घटपदस्य द्रव्यत्वेन द्रव्ये लक्षणाप्यजहत्स्वार्था स्वशक्यसाधारणरूपेण लक्षणा। अजह
त्स्वार्था। स्वशक्यावृत्तिलक्ष्यतावच्छेदकविशिष्टलक्षणा च जहत्स्वार्थेत्यपरे लक्षितलक्षणा च
रवबोध्यवाच्यघटितसंबंधेन लक्षणा। यथा द्विरेफपदे द्वयवत्पदवाच्यत्वसंबंधेन लक्षणा
सा च जहत्स्वार्थेति केचित्। परे तु यत्र शक्यतावच्छेदकरूपेणाशक्यभाने सा जहत्स्वार्था। यत्रै
तेन रूपेणाशक्यभानं तत्राजहत्स्वार्थेति। यत्तु द्विरेफपदे द्विपदं तात्पर्यग्राहकं रेफपदे न रेफद्व
यवत्पदं भ्रमरपदं लक्षतेतेन भ्रमरबोध इति तन्न। द्विरेफपदस्योत्तरविभक्त्यार्थे तत्राऽन्वयप्रसं
गात्। तस्मात्प्रकृत्यर्थत्वात् विभक्त्यंतभ्रमरपदे लक्षणायां न दोष इति ध्येयं। अत्र नातिप्रयोगा

तु सति रीती लक्षणानिलपदस्य नीलत्वनियतत्वमानो तदा दृष्टार्थकत्वं विधिनिततात्पर्यमवधार्यमर्था
र्थे तेन त्रक्रूरि पूर्विकालक्षणा। यथांमेइ पदस्यानिष्टहसंवेधिनियुक्तो। पत्ततात्पर्य तत्र योगादेवयु
क्तेषा न्वयबोधेः ननु स्वर्गकामो यजेत इत्यत्र योगात् स्त्रीशूद्रयोरप्यधिकारापत्तिरिति चेत। न तत
योर्विद्याभिषेधेन स्वर्गकामपदसंकोचे न तदतिरिक्त स्वर्गकामस्य ग्रहणा। परे तु अध्ययनजन्य
ज्ञानवत्त्वमात्रस्य क्रतुविधयश्रुतितार्था नान्यस्यापि विद्यामा हि। पति। तेन न तेषामधिकार इति द्विती
लक्षणाबीजं तात्पर्यानुपपत्ति न तु शक्यान्वयानुपपत्तिः यष्टीः प्रवेशयेत्यादावभावात् तात्प-
------- स्तत्रायीति चेत। न। तात्पर्यविषयशक्यान्वयानुपपत्त्येक्तया तात्पर्यानु
पपत्तिरेव लाघवाल्लक्षणाबीजमिति केचितः अन्ये तु मुख्यार्थान्वयानुपपत्तिः क्वचित्तात्पर्यानु
पपत्तिर्लक्षणाबीजं। तथाहि मुख्यार्थान्वयानुपपत्त्या लक्षणाकल्पनं तत्र श्रोतृत्वस्यार्थान्व
प्रबोधः सर्वे गंगापदं तीरबोधकत्वेन तात्पर्यविषयकत्वादित्यनुमिते तदिदं यदंशक्यसं

संबंधेनातिरेकस्थापकतयातात्पर्यबोधकेतीरशक्तत्वेनाज्ञायमानत्वे सति तीरबोधत्वादिति क्रमेणा
त्तात्पर्यानुपपत्त्यालक्षणाकल्पने। एवं च लक्षणाकल्पकत्वेन इपोरस्य प्रयोगः कल्पकानतु
गमस्याप्रेषत्वात् वह्नौ धूमालोकादिवदित्याहुः ननु गंगापदस्य तीरे शक्त्यभावेनासाधुत्वापत्तिरि
चेत्। न। कृत्रिमत्वं पदसाधुत्वं न तु शक्तत्वं लाक्षणिकस्यापि साधुत्वादिति केचित्। परे तु नव
मत्वं पदसाधुत्वं केवलं प्रकृतिप्रत्ययौ बोधयति ग्रामग्राम इत्यादेः साधुत्वापत्तेः॥ किं तु व्याकरणा
परिगृहीतत्वं। न च साधुशब्दव्युत्पादकत्वमेव व्याकरणमित्यन्योन्याश्रयः तावदध्यायकृदत्वे
व्याकरणत्वादित्याहुः एवं चैकजपदं यज्ञत्वविशिष्टे शक्तमनुपपत्त्यादिज्ञानं विनापि यज्ञत्व
त्वविशिष्टबोधकत्वात्। न च यज्ञत्वेन रूपेणानुभवस्तु संदिग्धः यज्ञानुभवेस्तु पंकजनिकर्त
कत्वेन योगादेवेति वाच्यं। योगेन कुमुदादावपि धीप्रयोगात्। रूढिस्वीकारे तु यज्ञत्वविशिष्टे
रूढिज्ञानस्य यज्ञान्यविशेष्यकबोधप्रयोगयोः प्रतिबंधकत्वान्न दोष इति प्राञ्चश्चैकपशो
धायाव्बोधस्यार्थेन शक्तिं। इयत्त्वयस्यज्ञत्वविशिष्टे लक्षणाया तादृशबोधसंभवात्। नापिकु

मुद्‌ज्ञानप्रतिबंधार्था उपत्ययनिरूढलक्षणायास्तादृशबोधाप्रतिबंधकत्वसंभवादितिचेदिति। तन्न। इ
कपदोपस्थाप्यनामभेदान्वयस्याव्युत्पन्नत्वेन पंकजमिकत्वेपद्ममिति बोधासंभवादितिकू। अत्रभा
मामकाः पंकजपदप्रयोगनियतविषयप्रयोगानुभवजन्यसंस्कारादेव पद्मत्वविशिष्टस्मारणासं
भवान्न तदर्थशक्तिः। अवयवशक्तिग्रहकाले पद्मत्वविशिष्टोपस्थित्या जेनरूपेण पंकजपदात्तस्मृ
तेः नाप्यनुभवार्थतच्छाब्दबोधे तद्व्यपशतियोगिशक्तिपदत्वे नहेतुत्वेनावयवैरेवानुभवसंभवादिति
। तन्न। पंकपदस्य पंकेशक्ति यथाव्यवहारात्तथा पंकपदस्यापि शक्त्यनिवार्यत्वात्। यद्धर्मावच्छि
न्नहीति जन्यपदार्थोपस्थितेः तद्धर्मावच्छिन्नशाब्दबोधसामान्ये हेतुत्वाच्च। किंचरथकारशब्दस्या
पिजातिशेषावच्छिन्नेशक्तिर्नेस्यात्। यत्र तद्विशिष्टबोधवत् जातिविशेषावच्छिन्नबोधस्यापि संभवा
त्। तथाचवर्षासुरथकारोग्नीनादधीतेत्यत्र जातिविशेषावच्छिन्नस्पर्शीप्रमुपस्थीतत्वात्तस्यै
बाधानंविधियत इतिसिद्धांतव्याकोपश्चस्यादितिदिक्। अपरे तु तद्बोधकत्वं तत्र तत्साधुत्वं पंका राम
पदस्यकुमुदाबोधकत्वेन तत्र साधुत्वाभावादेव नमुदबोध इति। तन्न। साधुत्वज्ञानस्य शाब्द

बोधेहेतुत्वात्। बाधितत्वादिं तेषि बोधापत्तिरिति चेत्। न। व्याकरणेति ष्फलत्वरूपासाधुत्वनिश्चयेन
प्रतिबंधात् यद्वा। साधुत्वनिश्चयेपि अपभ्रंशात् शाब्दबोधस्य जायमानत्वादसन प्रतिबंधक इ
ति। नन्वपभ्रंशानां बोधकत्वात्तेषु व्यवहारादिशक्तिरनिवार्या। न च लक्षणया तेषां बोधकत्वं शक्त्य
भावे न तस्या असंभवात्। न चापभ्रंशस्मारितसाधुशब्दादेवार्थप्रत्ययः साधुशब्दमजानतोप्य
मराणां ततोर्थप्रत्ययात्। न चेच्छक्तिभ्रमाद्बोधकत्वं। शक्तिग्राहकस्य व्यवहारस्योभयत्र स
त्वात्। अन्यथा वैपरीत्यस्यापि सुवचत्वादिति चेत्। न। एकत्र शक्त्यारोपे संस्कृतपदे तेनोभय
त्र शक्तिगौरवात्। न चापभ्रंशे शक्तिः संस्कृते शक्त्यारोपोस्त्विति वाच्यं। अपभ्रंशानां देशनानात्वादने
क शक्तिकल्पने गौरवापत्तेः॥ संस्कृतस्य सर्वत्रैकत्वात्। अत एव प्राकृतेपि न शक्तिः। तस्यापि
नानात्वात् शक्तिबाहुल्ये गौरवात्। धीरे तु प्रत्येकमपभ्रंशेन विशिष्य मनादिरहात्तत्रापि श
क्तिः। न च तेषामयज्ञे प्रयोगायत्तिः साधुभिर्भाषितव्यमित्यनेन साधुशब्दस्यासाधुविशेषे

व्याकरणाप्रतिपाद्ये संस्कृते तात्पर्यादित्याहुः ननु शक्तेरीश्वरेच्छात्वेनातिरिक्तपदार्थत्वेन वा न तज्ज्ञा
नं हेतुः नैयायिकानां मीमांसकानां मिमांसकानां च शाब्दबोधोदयात्। शाब्दत्वावच्छिन्ने तेन तेन
रूपेण कारणत्वे व्यभिचारात्। किंतु वृत्तिजनकतावच्छेदकसंबंधत्वेन ज्ञानं हेतुस्तथा च तत्तज्ज
नकत्वज्ञानमेव तत्तद्बोधे हेतुरस्तु। न चैवं लक्षणोच्छेदे गंगायपदात्। विलंबात्तत्रापि च भूरियोगास्तु शक्त
इति व्यहारः यत्र न भूरिप्रयोगः तत्र लक्षणेति व्यवहारसंभवात्। तत्र [illegible]वच्छे
दकाकाग्रहेपि स्वस्वरूपयोग्यतारूपवृत्तिजनकताग्रहवत्तद्बोधस्वरूपजनकतासुग्रहै
वेति चेत्। न। अपभ्रंशस्थापितहीजनकतयार्थवत्वेन तत्तद्विभक्त्या यत्ता साधुत्वापत्तिरिति
केचित्। चिंतामणिकृतस्तु देवदत्तादिपदार्थबुद्धौ संकेतज्ञानस्य कारणत्वकल्पनाद
त्यज्ञापितत्कारणत्वकल्पनं। न च सादिपदजन्यशाब्दबोधे संकेतज्ञानं हेतुर्नान्यत्रेति
वाच्यं। लाघवेन शाब्दत्वावच्छिन्ने तद्धेतुत्वादित्याहुः लक्षणा च पदवृत्ति वृत्तिताव्य

क्रिवत्। ननु गंभीरायां नद्यां घोष इत्यादौ पदे लक्षणाऽसंभवाद्वाक्ये लक्षणां स्वीकारेणान्वयंश्रि
यमूनतयाहिः। गंभीरपदस्य नतीरे लक्षणा। तथा चान्वयापत्तेः नामार्थयोरभेदान्वये ननवास्ती
रे भेदेनान्वयासंभवात् अभेदस्य तत्र बाधितत्वात्। नापि गंभीरतीरे नद्यास्तीरेऽन्वयासंभवेन
गंभीरायामन्वयो वाच्यः स च न संभवति। एकदेशे भेदेनान्वयासंभवात् नापि नदीपदस्य तीरे गं
भीरायामित्यस्यान्वयात्। तस्मात् सप्तम्यंतवाक्यस्यैव गंभीरनदीतीरे लक्षणा। न च शक्याभावेन
स्वशक्यसंबंधरूपलक्षणाया असंभव इति वाच्यं स्वबोध्यसंबंधस्यैव लक्षणात्वादिति चेत्। न। गंभीरा
यां नद्यामिति नदीपदोत्तरसप्तमीसहितस्य गंभीरनदीतीरे लक्षणायां तत्राधारताप्रत्ययो न
स्यात्। तदुत्तरसप्तम्यभावात्॥ नदीपदोत्तरसप्तमीरहितस्यार्थबोधकत्वादेव न लक्षणा।
यद्यपि सप्तमीसहितस्य गंभीरस्यादि तीराधारत्वे लक्षणासंभवति तथाप्येकपदस्य तात्प
र्यग्राहकत्वेनापरतत्त्वरूपे प्रवीयहेभस्य राल्लक्षणायैव शाब्दबोधसंभवेन पदद्वयस्य

न्या:

गायां मानाभावात्॥ एवं राजपुरुषमानयेत्यत्र राजपदस्य राजसंबंधिलक्षणायां राजसंबंध्य
भिन्नपुरुषबोधसंभवात् न तत्रापि वाक्ये लक्षणा। न चैवं कर्मधारयापत्तिः समासपूर्वदश
यां पदयोस्तुल्यार्थत्वाभावात्। न च राज्ञः स्वामित्वेन तन्निरूपकत्वरूपसंबंधवत्त्वेन
वा पुरुषेन्वयो यद्यप्युपपन्नौ किं लक्षणयेति वाच्यं। नामार्थयोर्भेदेनान्वयानंगीकारात्
न्यथा राजसंबंधः पुरुष इत्यत्र तथा बोधापत्तेरिति नव्याः। परे तु लक्षणा षष्ठ्योर्वान्यपदबोधिकाषष्ठी
लोपमजानतस्तु शक्तिभ्रमादन्वयबोध इत्याहुः। कश्चित्तु समासातिरिक्तस्थले नामा
र्थयोर्भेदान्वयानंगीकाराद्विग्रहसमासयोः समानार्थकत्वार्थं राजपदस्य राजसं
बंधिलक्षणामित्याहुः॥ एवं चित्रगुमानयेत्यत्र गोबहुपदस्यैव तादृशार्थलक्षणा। गोपदं
तात्पर्यग्राहकमिति वाच्यं। गोपदोत्तरविभक्त्यर्थकर्मत्वस्य तत्रानन्वयापत्तेः। न च

राम

तत्पुरुषे पूर्वपदाच्चित्रगुरित्यादौ चित्रपदं चित्रे गोपदं स्वामिपदं स्वामिनि च। गोसंबंधिनस्तादात्म्येनान्वयसं
भवेन: सर्वपदसार्थकत्वाय पदस्य राजसंबंधिपुरुषे लक्षणा राजपदं तात्पर्यग्राहकमस्त्विति वाच्यं। अ
र्थबोधकत्वेन सार्थकत्वतात्पर्यग्राहकत्वेन सार्थकत्वस्यानंगीकारात् न चत्तद्दनमित्तत्रसर्वेनाम्रल
क्षणाभावे नोत्तरपदस्य लक्षणेति वाच्यं। तस्य लघुत्वेन शक्तिरन्यत्र लक्षणेत्यस्याभिहितत्वात्। न
न चैद्दनमित्तत्रसर्वे बहुव्रीहावपि गोपदस्य गोस्वामिनि चित्रपदस्य चित्रसंबंधिलक्षणाया गविचि
त्रसंबंधिनोऽभेदेनान्वयसंभवात्पदद्वयस्यार्थबोधकत्वेनैव सार्थकतास्त्वीति वाच्यं ॥ एकदेशा
न्वयस्यास्वीकारात्। पदद्वये लक्षणायां गौरवाच्च। अत एव चित्रपदस्य चित्रसंबंधिनि गोपदस्य गो
स्वामिनि लक्षणा निरस्ता। गवि चित्रबोधाभावापत्तेश्च। वैयाकरणास्तु। बहुव्रीहौ शक्तिरेव। अ
न्यथा घटपदेपि हकारलक्षणाया बोधसंभवाच्छक्त्याभावापत्तेरित्याहुः तन्न। समासांतरेपि तु
ल्यत्वात्। किं च समासे शक्तिस्वीकारे: अर्थवत्त्वेनैव समासस्य प्रातिपदिकत्वसिद्धौ समासग्र
हणमनर्थकं स्यादिति कृ: ॥ शिंशपावृक्षइत्यादिकर्मधारये न शक्तिर्न वा लक्षणा। नाम

र्थयोरभेदान्वयेनैव बोधसंभवात् अत एव तत्पुरुषात् कर्मधारयो लघीयानिति र्षादस्य यतेरधिकार इति तत्
संगतिरिति दिक्। ननु। विशेषणानां विशेष्येणाबहुत्वमिति सूत्रे विशेषणानां समस्यत इत्येतावतैव समासबलादेव
विशेष्यादिग्रहणोऽसिद्धेरन्यतरपदवैयर्थ्यापत्त्या विशेषणतावच्छेदकविशेष्यतावच्छेदकयोर्व्यभिचार
एव कर्मधारय इति विज्ञायते तथा च कथं शिंशपावृक्ष इत्यत्र कर्मधारयः परस्परव्यभिचाराभावादि
ति चेत्। अत्र केचित्। ज्ञापकशाद्विशेष्यतावच्छेदकव्यभिचार एव कर्मधारयाभिधानात्। ननु
परस्परव्यभिचारे कर्मधारयाभिधाने गौरवात् न चैवं तत्र कः सर्प इत्यादावपि स्यादिति वाच्यं। त
त्र बहुलग्रहणेनैव समासनिषेधात्। अत एव वृत्तिकारैरपि वृक्षः शिंशपेत्येव प्रत्युदाहरणं दत्तं।
न च विशेषणस्य पूर्वनिपातविधायकसूत्रे स्मै च तां शप्रयोगरणो विशेष्यो बहुलमिति सूत्रे चैक
न्यतरपदवैयर्थ्यं तदवस्थमिति वाच्यं॥ विशेषणविशेष्यभावस्य कामचारत्वेन हस्य यदृस्यापि
विशेषणत्वसंभवात्। न चैवं विशेषणविशेष्यभावकामचारत्वे नत्र लतील भिति प्रयोगा
पत्ति॥ तादृशप्रयोगे तत्र लस्य विशेषणत्वविवक्षायां प्रामाणिकैरपीष्यत्वेः स्वीका

रात। अत एव चंद्रनुयंसुत्वचं द्वयद्वयोः साधुत्वमिति दिक ॥ यत्तु लोकप्रसिद्धमेव विशेषणांतद्वाच
कपदमेव सूत्रे विशेषणपदमित्याह। तन्न। लोकपदस्यैवदेकदेशविकल्पग्रासात्। केचित्तु विशे
ष्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वे नैव विशेषणत्वात् उत्पल नीलनीलोत्पलयोरपि साधु
त्वं। न चैवं कृष्णसर्पादिप्रयोगस्य विशेषणपूर्वनियातेनैव कारणे सूत्रेन्यतरपदे वैयर्थ्यमिति वाच्यं
बहुलग्रहणेनैव कचिन्नित्यसमासः कृष्णसर्पः। लोहितशालिः कचिन्न रामो जामदग्न्यः व्या
सः पाराशर्य इत्यादिप्रयोगवारणोद्देश्यत्वादित्याहुः। यत्रोक्तं शब्दकौस्तुभे। उपसर्जनमिति तावद
न्वर्थसंज्ञेत्युक्तं प्रधानमुपसर्जनमिति। तदिह जातिगुणशब्दयोः सन्निपाते गुणरूपविशेषणांतस्य
द्रव्यपरिच्छेदहारैव क्रियानिवर्तकत्वात् ॥ श्रौतव्यवहारेष्वेवं श्वेतं छागमालभेतेति चोदनायां श्वे
तच्छागालाभे कृष्णछागं आलभते न तु श्वेतमपि पश्वंतरं। किं जात्योरप्युपनिपात एव भेदन नि
लोत्पलं याचकब्राह्मण इति व्यवस्थितः प्रयोगः। यत्र तु गुणशब्दयोः क्रियाशब्दयोः गुणक्रि
याशब्दयोर्वा सन्निपातः तत्रानियमः खंजकुब्जः कुब्जखंजः पाचकपाठकः पाठकपा

चकः पाचकस्तं जइति शिंशुपात्वस्य तत्र तु शिंशुपात्वस्य वृक्षत्वस्य व्यापकत्वाद्विशेषणाविशेष्या
भावव्यवस्थास्यैव। तदसत्। यतस्ताज्ञातक्रियान्वयित्वप्रधानं यत्तरेषस्यान्वयितद्प्रधानं। एताव
तैवस्त्रोतव्यवहारनिर्वाहे विशेषणाविशेष्याभावकामचारस्य दुर्वारत्वात्। नीलोत्पलमिति उत्पलनी
लमिति चेति त्पाद्वैसाज्ञातक्रियान्वयित्वस्य कदाचिन्नीले कदाचिदुत्पले संभवाद्विशेषणाविशेष्या
भावस्य कामचाराद्उत्पलनीलं निलोत्पलमिति प्रयोगः साधुरेव। एवं पाचकब्राह्मणा इत्यादि
द्रष्टव्यं। यत्तु वृक्षः शिंशुपा तस्यैव वृक्षत्वाच्छिंशुपाविशेषणमेवेति। तदपि न। विशेषणविशे
ष्याभावभावकामचारत्वेन व्यवस्थायोगात्॥ अन्यथा। प्रमेयः पदार्थ इत्यत्र विशेषणा
विशेष्याभावापत्तिरिति दिक्। उपकुंभमर्धपिप्पलीत्याद्यव्ययीभावे तु तत्पदलक्षणायैवोपप
त्तौ न शक्तिर्नैवाकेवलक्षणा॥ पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीति नैवाकेवलक्ष
णा। समाहारस्य ज्ञानं तु न समाहारबोधकत्वेन किंतु नद्विवद्व्याद्वित्वादिरूपिकौ। न चुहि केव
द्विवचनापत्तिरसाधुत्वात्। परे तु पाणिपादपाणिप्रतियोगिकं पादं पादप्रतियोगिकं

कं समाहारं लक्षयंतीति तत्र परंपराया वा द्वंद्वकर्मत्वान्वयः ॥ समाहारस्तु तुल्यवदेकक्रियान्वयित्वरूपं
साहित्यं सेनावनादिवद्वये द्वावुद्धिविशेषविषयविषयत्वं वेत्याहुः ॥ इतरेतरद्वंद्वे तु धवखदिरावित्यादौ
धवखदिरमात्रप्रतीतेर्लक्षणाशक्तिर्वेति दिक् । नञ्तत्पुरुषे त्वघटः पटः इत्यत्र घटपदं घटसंबंधि
तो लक्षकं नञ्पदमन्योन्याभाववतो लक्षकं ससंबंधिकस्थले चैत्रस्यानप्तेत्यादौ स्वैकदेशान्वयस्वी
कारात् तथा च घटसंबंधिभिन्नात्तोन्योन्याभाववत्तेव घटद्भिन्नः पट इति बोधः परे तु चैत्रस्यानप्ते
त्यादौ पुत्रस्य पुत्रे षष्ठ्यर्थसंबंधस्यान्वयांगीकारात् । अघट इत्यादावन्योन्याभाववत्वे च घटसंबंधिना
न्वयः । अत एवाघटं घटभिन्नत्वादौ समानविभक्तिकत्वेत्याहुः । अन्ये तु निपातातिरिक्तनामार्थयो
र्भेदातिरिक्तसंबंधेनान्वयानंगीकारेणाघटः पट इत्यत्र घटस्य प्रतियोगितयान्योन्याभावे
तस्य चाधिकरणतया पटेन्वयबोधसंभवान्न लक्षणा । अत एव चंद्र इव मुखमित्यत्र इवार्थ
सादृश्यप्रतियोगितया चंद्रान्वयः नच भूतले घटो नास्तीत्यत्र कथं घटात्यंताभावबोधेन

कं समाहारं लक्षयंतीति तत्र परंपरया वादनकर्मत्वान्वयः ॥ समाहारस्तु तुल्यवदेकक्रियान्वयित्वरूपं
साहित्यं स नाव व्यादिवृत्ये ज्ञाने तु द्वि विशेषणविधया विषयत्वं वेत्यादि ॥ इतरेतरद्वंद्वे तु धवखदिराविंत्यादौ
धवखदिरमात्रप्रतिनेयलक्षणाशक्तिर्वेतिदिक् । नञ्तत्पुरुषे तु अघट पट इत्यत्र घटपदं घटसंबंधि
तोलक्षकं नञ्पदमन्योन्याभाववतो लक्षकं संसर्गबोधकस्थले चैत्रस्य न हस्तादौ रूपकादेशान्वयस्वी
कारात जघाचघटसंबंधभिन्नात्योन्याभाववत्तेव घटद्भिन्नः पट इति बोधः परे तु चैत्रस्य न ह
स्तादौ पुत्रस्य पुत्रे परस्परसंबंधस्यान्वयांगीकारात् । अघट इत्यादावन्योन्याभाववत्त्वेव घटसंबंधिना
न्वयः । अत एवाघटं पटं मित्यादौ समानविभक्तिकत्वेत्यादि । अन्ये तु निपातातिरिक्तनामार्थयो
रेवाभेदातिरिक्तसंबंधेनान्वयानंगीकारेणाघटः पट इत्यत्र घटस्य प्रतियोगितयान्योन्याभावे
तस्य चाधिकरणतया पटेन्वयबोधसंभवान्न लक्षणा । अत एव चंद्र इव मुखमित्यादौ इत्यत्र चंद्रसा
दृश्यप्रतियोगितया चंद्रान्वयः न च भूतले घटो नास्तीत्यत्र कथं घटात्यंताभावबोधेन

न स्येऽन्योन्याभावे शक्तत्वादिति वाच्यं। अन्योन्याभावसंसर्गाभावसाधारणाभावत्वस्यशक्यतावच्छेदकत्वात्ताप
ञाधिकरणप्रतियोगिवाचकपदयोः समानविभक्तिकत्वे तत्र तादात्म्यसंबंधावच्छिन्नप्रतियोगितया नञ
र्थे प्रातिपदिकार्थान्वयेन तादात्म्यसंबंधावच्छिन्नप्रतियोगिकत्वेनाभावबोधादन्योन्याभावबोधः यत्र चाधि
करणवाचकपदे सप्तमी तत्र तादात्म्यातिरिक्तसंयोगादिसंबंधावच्छिन्नप्रतियोगितया नञर्थे प्रा
तिपदिकार्थान्वयेन तत्संसर्गाभावबोधः अन्योन्याभावत्वेनान्योन्याभावत्वसंसर्गाभावत्वेना
पि संसर्गाभावे शक्तिस्वीकारात्। न चैवं चैत्रो न पचतीत्यादौ संसर्गाभावबोधो न स्यादधिकरण
वाचकपदे सप्तम्यभावबोधात्। आख्यातस्य कालिसंबंधेन स्वार्थप्रकारकान्वयबोधजनकत्व
यत्तादृशसमभिव्याहारस्यापि नत्तादात्म्यसंबंधावच्छिन्नप्रतियोगितासंबंधेन नञर्थप्रकारतया
यान्वयबोधजनकत्वमत एव कालः पचतीति न प्रयोगः केचित्तु नञ्विनिर्मोके यत्र प्रति
योग्यधिकरणयोरभेदान्वयः तत्र नञा अन्योन्याभावबोधः अन्यत्र संसर्गाभावबोधः
चैत एव आख्यातस्य कर्तृवाचकत्वे न जानपचतीत्यादौ कर्तृभेदबोधेऽपि न क्षतिः ॥ एवं

न नञर्थस्य भेदे नञात्वर्थे प्रकारतयान्वयः अतो घटो न पश्यति चैत्र इत्यादितो घटाभावं पश्यति चैत्र
इति न बोधः एवं विभक्त्यर्थप्रतियोगिकनञर्थस्योद्देश्यतयापि न बोधः ॥ अत एव ग्रामे चैत्रस्य
नेत्यादितश्चैत्रस्वत्वाभावो ग्रामे इति न बोधः ॥ न च घटो नास्तीत्यत्र घटस्याभावो रति बोधो गी...रे भावना
यत्राभावान्वयेन चैत्रे नाख्यातोपस्थितसंख्यान्वयस्तत्र घटो नास्तीति प्रयोगाय तिर्द्धिईत्वावच्छि
न्नप्रतियोगिताकघटाभावस्यैकत्वादिति वाच्यं भावनाख्यप्यभावप्रतियोगिन्येव रव्यान्वयस्य
समभिव्याहारविशेषेण बोधजनकत्वात् परे तु भूतले घटोऽस्तीत्यत्र नाभावविशेष्यको बोधः किं
तु कारकान्वितधात्वर्थस्य नञर्थेन तस्य चाख्यातार्थेऽत्राश्रयत्वे अन्वयात् भूतलवृत्तितास्य सत्तायां
बोधः सत्ता न जातिविशेषरूपे च न तु तत्त्वभाव इति योग्य घटोऽस्तीति बोधः केतिसाकाङ्क्षता
यन्तीत्याहुः परे भूतलास्ति त्वाश्रयत्वाभाववान् घट इत्याख्यातार्थाश्रयत्वस्यैव बोधः इत्यादि
शेषणीभूत प्रथमान्तपदोपस्थाप्ये संख्यान्वयात् घटे द्वित्वान्वय इत्याहुः नित्यं रथो गच्छतीति प्रयो
गात् नाख्यातार्थः कृतित्वेन कृतिः किं तु व्यापारत्वेन व्यापारः न च तत्र व्यापारे लक्षणादि

न्याः

भक्तो चयइ सा दुः तिनुरथो गछतीति प्रयोगात नाख्यातार्थः प्रकृतित्वेन कृतिः किंतु व्यापारत्वेन
व्यापारः। न च तत्र व्यापारे लक्षणानंगीकारात। अन्यथा कर्मणि षष्ठी तात्पर्यानुशासनत्वैयर्थ्यात। अनु
शासनं विनापि यंशा पद लक्षणाव तस्यापि लक्षणा संभवादिति चेत। नास्य घटेन यच्चतीत्यस्य पतत्रा पं
क रोति नाविवरणोन च पत्तत्वस्याख्यातशक्यतावच्छेदकत्वेन रथो गछतीत्यत्र व्यापारे आश्रयत्वेवा
लक्षणास्वीकारात एवं जानाति विद्यते निद्रातीत्यादावपि घटो नश्यतितादौ नाश्रयत्वं किंतु प्रति
योगित्वे लक्षणा। अत एवान्यदियगमनानुकूलहोदनादिमति न गछतीति प्रयोगः तस्य ग
मनाश्रयत्वाभावात। न च विभक्तौ लक्षणां गीकारे नु शासनवैयर्थ्यमिति वाच्यं। अनुशा
सनात स्वविभक्तौ लक्षणाभावेपि तिङः विभक्तौ लक्षणायां बाधकाभावात। यद्वानुशासनव
लात स्वविभक्तौः स्वविभक्तंतरार्थे लक्षणायास्वीकारात। कथमन्यथा कर्मणि शत्याया
द्वितीयाया घटं जानातीत्यत्र विषत्वे लक्षणा कथं वा दृष्टा दृमो पतीयततीत्यत्र विभाव
गशत्याया: पंचम्याधूमादित्यत्र ज्ञाप्यत्वे लक्षणायुक्ते जन्यत्वावच्छेदकजाविशे

षावधि ल्वेपति धातोः शक्तिः शक्तिर्याया जनकत्वसंबंधे न पंचम्यर्थविभागे तत्वेन तु स्यान्निर्विभागत्र
न कविल स्राशाक्रि स्त्रययशाभूमिः पततीति बोधाद्विभागे पंचम्याः शक्तिः। न चरथोगं छनितित्याद्य
वाख्यातार्थयत्न स्यवाधादनन्वयेपि धात्वर्थस्यैव गमजादे इत्थेन्व पवोधो पपत्तौकि मर्थमाश्र
य त्वेल स्यरोति वाच्यं तंडुलः पचति इतंडुलस्य पाकेकर्मतासंबंधेनान्वयात विशेष्यतया भि
हितीत्वसंबंधेन प्रातिपदिकार्थप्रकारकबोधं प्रति नियाते स्य पत्रहि ता न्यतमजन्योपस्थितेः का
रणात्वतंतंडुलं पचतीत्यादितः पाकवत्तंडुलविषयकज्ञातिमानिति बोधाभावत्र भेदातिनि
यातस्य पत्रहि तान्यनिरिक्तसंबंधावच्छीन्नधात्वर्थप्रकारतानिरूपितविशेष्यतयात्त्वन्वयबोध
जन्योपस्थितेः हेतुत्वांगीकारात। द्वितीयाविषयत्वार्थप्रकारतानित्वातास्त्वर्थस्यातिद्वये
न्यथा भावेन घटे न स्थीयते रूपमित्यतः स्थितिमद्घटजन्यरूपमिति बोधापत्तेः। अतस्त
व घटेन स्थीयते रूपमित्यत्र स्थितेराश्रयस्वरूपा ख्यातार्थापिना न्वयः घटस्येतरविशे

५६

न्या:

शात्वाख्यातार्थविशेषणत्वासंभवादितिदिक्‌ः अतएवनामार्थस्याख्यातार्थभावे तंडुलः पचतित्वयाकचतंडुल
कर्तिमानितिबोधाभावेपिनक्षतिः॥ केचित्तुधात्वर्थप्रकारकबोधस्यापिविशेष्यतासंबंधेननामार्थाभावे
नविशेष्यतासंबंधेनधात्वर्थप्रकारकबोधंप्रतिकृतिन्नाद्यन्यतरजन्योपस्थितिः कारणत्वमितिनाताद्द
शोबोधइति। यद्यपिज्ञानंजातित्यादौज्ञानपदेनधातुनासर्वज्ञानोपस्थापनाद्धातुजन्योपस्थितिवि
षयरूपधात्वर्थस्यसर्वथार्थेपिप्रतियदिकार्थस्यचतिङर्थोयद्यपिप्रकारत्वाद्व्योव्यभिचारः तथापि
घटप्रकारककर्मत्वादिविशेष्यकनिरूपितत्वसंसर्गकबोधविशेषेणमेताद्दशानुपूर्वीज्ञानंहेतु
रवेपाद्दशानुपूर्वीकवाद्दशोबोधोनुभूवसिद्धस्ताद्दशानुपूर्वीज्ञानंकारणंताद्दशबोधविशेषेबोधेविशेष
णत्वमवहितोत्तरत्वमेवेतिनव्यभिचारः एवंविशेष्यतासंबंधेनाभेदसंसर्गकनामार्थकप्रकारक
कबोधंप्रतितन्नामसमानविभक्तिकपदजन्योपस्थितिः कारणं। तन्नामोत्तरविभक्तिविजा राम
तियविभक्त्यासमभिव्याहृतपदजन्योपस्थितिर्वाकारणं॥ तेननीलघटइत्यत्रसंग्रहः तंडु

लं पृच्छतीत्यत्र विकल्पाग्निः एककर्मत्वं द्वितीयार्थः सविषयकधात्वनुयोगे तु विषयत्वं द्वितीयार्थः वस्तुतो ग्रामं गच्छ्ति
त्यतीत्यत्र संयोगे विभागे चलाद्यकर्मकाद्द्वितीयायाः शक्तिरन्यत्र लक्षणेति ध्येयं। व्यापारबोधकेनाख्यातेन व
र्त्तमानत्वादिकं व्यापारे बोध्यते। व्यापाराबोधके न तु धात्वर्थे तद्बोध्यते॥ भविष्यत्वातीतत्वे आख्या
तविशेषवाच्ये तत्र भविष्यत्त्वमाद्ये व्यातेन वर्त्तमानसारे अतीतत्वमंत्ये व्यापारे न्वेति तेनोत्तरकृतिग्रामभा
माहायनकृतिकाले भविष्यदर्थकाख्यातप्रयोगः नचाथकृतिध्वंससमाहायभूतार्थकाख्यातप्रयो
गः तंडुलं पचतीत्यत्र तंडुलः कर्मत्वे तच्चयाके सच वर्त्तमानत्वं चेहक्षतावत्त्वेतीति तंडुलकर्म
कपाकीयवर्त्तमानकृतिमांश्चैत्र इति बोधः नचैहकाष्ठं भिंदरोर्यपततीति प्रयोगापत्तिः भूमिनि
ष्ठसंयोगजनकक्रियानुकूलव्यापारस्य मर्दोसत्त्वादिति वाच्यं॥ एवं विसमभिव्याहारे गाद्वितीया
याः साधुत्वाभावात संयोगादिफलाबोधकत्वाच्चेति केचित नतु ग्रामं गच्छतीत्यजतीत्यादौ सं
योगद्विभागादिरूपफलस्याद्वितिपार्थत्वक्रियारूपव्यापारस्य धात्वर्थत्वात्स्याजियो। पर्यायता
पत्त्या ग्रामं गच्छतीतिवत्क्षव्ये ग्रामं त्यजतीति प्रयोगापत्तिरिति चेत व्यागमिधातु समभिव्या

हृतद्वितीयायाः संयोगरूपफलस्य त्यजिधातुसमभिव्याहृतद्वितीयाया विभागरूपफलस्य बोधकत्वस्वीका
रेणानतिप्रसंगाभावादिति केचित्। द्वितीयार्थः आश्रयत्वं कृतित्वं संयोगानुकूलकर्म गमेरर्थः विभागा
नुकूलत्यजेरर्थः तेन न तयोः पर्यायता॥ न वा तत्तद्धातुसमभिव्याहृतद्वितीयायास्तत्तत्फलबोधक
त्वस्वीकारेणानेककार्यकारणभावः॥ न च वृक्षात् द्रुमो पर्णीयतीत्यादौ भूमिष्ठ तद्वितीयायत्तिः क्रि
याजन्यफलशालित्वस्य कर्मत्वे तत्क्रियाजन्यसंयोगाश्रयत्वस्य भूमावपि सत्त्वादिति वाच्यं। द्वितीया
समभिव्याहृतधात्वर्थचेष्टेहकफलाश्रयता बोधकत्वस्वीकारात्। अतः स्वधात्वर्थतावच्छेदकफलशा
लित्वकर्मत्वमिति तस्यास्सम्यगशीयपत्तद्दनीद्वितीयास्स्वसंयोगबोधकत्वात् तथाप्रयोगप्रयोजः न च धा
त्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति मते घटं जानातीत्यत्र कर्मत्वं घटस्य न स्यात् इति वाच्यं ए
कदेशिमतेन तदभिधानात्॥ न च क्रियाजन्यफलशालित्वं कर्मत्वमिति मते घटे कर्मत्वानुप
पत्तिरिति वाच्यं क्रियाजन्यफलस्याद्वितीयार्थत्वाभावात्॥ किंतु संयोगविभागविषयत्वादेरेव
द्वितीयार्थत्वात्। धातोश्च ज्ञानक्रियादिवाचकत्वादिति संक्षेपः चित्रयाकान्ते तु त्वं जानाति

तियोगापत्तिः॥ द्वितीयार्थो विक्लित्तिरूपफलस्य न तु क्रियाजन्यफलशालित्वं॥ वृक्षाद्भूमौ पर्णं पततीत्यत्र कर्म-
जन्यसंयोगविभागाश्रयतावृक्षभूम्योः कर्मतापत्तेः। न चाधःसंयोगानुकूलव्यापारस्य पतत्यर्थत्वेन भू-
मेः कर्मत्वमस्त्विति वाच्यं॥ गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्नस्य पतत्यर्थत्वे तथा धात्वर्थ-
तावच्छेदकफलाभावात्। न च चैत्रो ग्रामं गच्छतीत्यादौ चैत्र[illegible]द्वितीयापत्तिः॥ संयोगानुकूलव्या-
पारस्य गमधात्वर्थत्वेन तदवच्छेदकसंयोगस्य फलाश्रयत्वादिति वाच्यं॥ तस्य धात्वर्थानधिकरणत्वेन
विशेषणीयत्वादित्याहुः। तन्न। घटं जानातीत्यत्र धातोर्ज्ञानमात्रवाचकत्वेन धात्वर्थतावच्छेदक-
फलाभावेन घटे द्वितीयाया अभावापत्तेः॥ किंच॥ तत्र यत्र मल्लमेषयोरुभयकर्मजन्यः संयोगस्तत्र म-
ल्लो मेषं प्रति गच्छतीति स्यात्॥ मेषस्य धात्वर्थक्रियाधिकरणत्वात्। मेषस्य धात्वर्थानधिकरणत्वे
तत्रास्ति मल्लनिष्ठक्रियानाश्रयत्वादिति चेत्। तर्हि स्वं प्रति गच्छतीति प्रयोगापत्तेः स्वसम-
स्यादेर्मेषनिष्ठधात्वर्थानधिकरणत्वेन कर्मत्वात्। एतेन परसमवेतक्रियाजन्यफलशालि-
त्वं कर्मत्वमित्यपास्तं। चैत्रेदं प्रति भाति॥ मेहोहि तियार्थः कर्तृकर्मभेदस्यापि प्रति

न्या:

स्यापि प्रतिवेन्न तथा प्रयोगः तथा च देवदत्तो ग्रामभिन्नग्रामनिष्ठसंयोगजनककर्मानुकूलकृतिमानिति वि-
धः महत्त्वभेदस्य महत्त्वाभावात् तथा प्रयोगः न च द्वितीयायामेवार्थत्वे चैत्रः चैत्रं जानातीति न स्यादिति वाच्यं
त्यजिगम्यादिधातुसमभिव्याहृतद्वितीयायास्तद्बोधकत्वात्॥ न च वृक्षाद्भूमिं पर्णं पततीति प्रयोगापत्तिः
॥ भूमिभिन्नत्वे सति भूमिनिष्ठसंयोगानुकूलकर्माश्रयत्वस्य त्वादिति वाच्यं॥ द्वितीयायाः संयोग-
विभागाद्यर्थकत्वे मते गमिधातुसमभिव्याहृतद्वितीयायास्तल्लोपकजत्वस्य सत्वेन तथा त्वर्थज्ञाने विक्लि-
त्तिविषयत्वस्य सत्वे न याकजन्यतंडुलविक्लित्तिविषयकज्ञानवानिति बोधसंभवेन तद्वारणाय स्व-
र्थप्रकारकबोधे सुविभक्तिभिन्नपदजन्योपस्थिते समानविशेष्यतया हेतुत्वं वाच्यं। तथा च देवदत्तस्य
ते न विक्लितत्वादित्यादितः चैत्रकर्तृकपचनंपक्वौदनस्य तत्त्वदिति बोधो न स्यात्। षष्ठ्यर्थस्य तत्त्वे जन्यत-
रूपं चमार्थ स्यान्वयात्। तत्र षष्ठीभिन्नापास्तु द्विभक्तिस्तद्भिन्नपदजन्योपस्थितेहेतुत्वमिति
वाच्यं॥ भूतले घटस्येति प्रयोगापत्तेः घटसंबंधे भूतलाधेयत्वसत्वादिति चेत् नायं चमर्थप्रकारकबो- राम
बोधे षष्ठीभिन्नसुप्भिन्नपदजन्योपस्थिते हेतुत्वात् सप्तम्यर्थादिप्रकारके पंचम्यतिरिक्तसुव

र्थप्रकारकबोधेसुप्भिन्नजन्योपस्थितेर्हेतुत्वात्। चैत्रेणतंडुलंपाचयतीत्यत्रइत्याहचैत्रेतिस्वतंडुल
कर्मकपाकीयायाकृतिस्तदनुकूलकृतिमान्मैत्रइतिबोधःतंडुलःकर्मत्वेनच्छेपाकेसचत्वतिपार्थो
निष्ठत्वंचणिजर्थकृतौसाचतिङर्थकृतौतिङः र्थकृतिविशिष्टमैत्रेचेति॥ णिचतेऽनुकूलः स्वयमेवेत्या
दौभेदानुकूलव्यापाररूपंकर्तृत्वंभेदप्रतियोगित्वरूपंकर्मत्वंचस्फुटादानुकूलेन्वेतिधातुना
च्छेकांक्षामर्यादयाततत्कुसूलभेदवान्किंबोध्यते॥ किंतततत्कुसूलकर्मकभेदत्वेनैवतत्कुसूलाया
बोध्यते। यद्योदनः पक्वाभुजेतेइत्यादावसंगायतदोदनकर्मिकाव्यक्तिस्तत्रचाकांक्षावैचित्र्या
त्साकृतिमत्कर्तृकेवभोजनजनकव्यक्तिर्भोसइतिनभिन्नकर्तृकेतिप्रसंगः आकाशंनपश्य
तीत्यत्रलौकिकविषयतयाआकाशवृत्त्याकृषाभ्यत्वस्याभावोभासतेलौकिकविषयता
आकाशस्यप्रतियोगितावच्छेदकतावच्छेदकसंबंधः पश्यामीतिविषयतारूपः स्वरूपसंब
धोव्याधिकरणः तेनाकाशघटोभयविषयकचाक्षुषसत्त्वेपिमैत्रः आकाशंनपश्यतीति

न्या॰

प्रयोगस्यानानुपपत्तिः॥ लौकिकविषयिताविनिरूपिततत्त्वावच्छेदेनाकाशविषयत्वाभावोऽवभासते गु
रुधर्मस्यापि प्रतियोगितावच्छेदकत्वादाकाशविषयकत्वमात्रं प्रतियोगितावच्छेदकमित्यपरे। त
तन्न। लौकिकविषयतावद्घटवाकृचे आकाशस्याऽलौकिकविषयतासत्त्वेऽपि तथा प्रतीतेः। इत
तं पश्यामीति बलादूम्येऽपि लौकिकपि लौकिकविषयतायाद्वितहामेयाहो आकाशभूयेऽपि तादृशविषय
तासत्त्वात्। आकाशेनिरूपिततादृशविषयतावच्छिन्नाभावः समानाधिकरणसंबंधावच्छि
न्नत्वबुध्यते। शशविषाणजन्यकार्मुकं नास्तीत्यत्र शशविषाणयोर्जन्यत्वरूपव्यधिकरणसं
बंधः॥ तेन शशविषाणजन्यकार्मुकाभावभासते। यदा आकदेकत्वं गाढनेत्रेणगाढपाशेनकपाल
दृभालेतलास्पार। इत्याहेकुतन्नित्वेचि आत्वदेकत्वकाभावइतिबोधवत प्रकृतितेऽपि न जन्यत्वप्र
तियोगितया शशपदार्थान्वयः। न जर्पदस्य प्रतियोगिविषाणे। तथा च शशपदार्थोवेचि त्र तथा राम
विषाणजन्यकार्मुकाभावमितिबोधः॥ रुचिदत्तादिमतेकोदव्यः भ्रस्यादेरधिकरणस्यापि शशे

न्वयात्। एवं पीतः शंखो नास्तीत्यादौ पीतत्वे शंखवृत्तोभयावच्छिन्नाप्रतियोगितवं शंखाभावयोः संसर्गः
यद्वा पीतत्वस्य शंखे समवायेन प्रतियोगितावच्छेदकत्वान्व्यधिकरणधर्मावच्छिन्नाभावबोधः संयो
नरूपं नास्तीत्यत्र प्रतियोगितावच्छेदकसंबंधोह्योरवत्वीत संबंधेन पीतसंयोगसंबंधेन वा शंख
त्वावच्छिन्नाभावबोधः निर्धारणाद्वा॥ भेदोभेदस्यार्थः भेदे चा प्रकृत्यर्थस्य कृतस्य पदार्थस्य प्रतियोगित
न्वयः प्रकृत्यर्थस्याधिकरणत्वेनान्वितस्य प्रतियोगितया भेदेन्वयः भेदस्या प्रकृत्यर्थे प्रतियोगि
तयान्वितेत्यर्थांतरे संपन्नक्षीरतमा पदार्थप्रकारतयान्वेति संपन्नक्षीरतमा चाभेदसंबंधेन क
ल्पा पदार्थे। भेदे प्रकृत्यर्थः प्रकारतयाभेदस्य प्रकृत्यर्थे कल्पा पदार्थप्रकारतयान्वेति॥ एवं च गवा
भिन्नाकल्प्याभिन्नागोभिन्नासंपन्नसंगृह्णिरतमाऽभिन्नेति बोधः यद्वा संपन्नक्षीरतमा कल्प्याभि
न्ना। गवाद्याभिन्नाशाकल्प्या संपन्नक्षीरतमाभिन्नेति भिन्नाविशेष्यकोधो बोधः केचित्तु गवां
कल्प्यां संपन्नक्षीरतमेत्यादौ च कल्प्याभिन्नगोसामान्यभेदो। भेदश्च पंचम्यर्थः आकांक्षावैचि
त्र्यात्कल्प्याभिन्नगोसामान्यभेदः संपन्नक्षीरतमापदार्थेन्वेति संपन्नक्षीरगवाभिन्नकल्प्येः

वृत्तित्वं च तयोः संबंधः अभेदश्च कृष्णोपरि अभेदोपरि प्रकृतयो गौरन्वगाभिन्नकृष्णत्वावच्छिन्नो
भेदश्च तादृशसंपन्नक्षीरगवाभिन्नाभिन्नकृष्णयोः संबंधः॥ एवं च गवाभिन्नाकृष्णा कृष्णभिन्न
गोसामान्यभिन्नसंपन्नक्षीराभिन्ना इति बोधः त्यइत्याहुः तन्न। कृष्णभिन्नगोसामान्यभेदे कृत्रि
याणांकरी प्रचुरदृष्टौतीसाधनुरोधात कर्णाभिन्नकृत्रिमभेदादेश्च शक्तिकल्पने गौरवापत्तेः
अन्येतु अभेदः षष्ठ्यर्थः सः प्रकारतया क्षीरपदार्थकृष्णपदार्थयोरन्वेति। गवाभिन्नकृष्णगवा
भिन्नसंपन्नसंपन्नक्षीरतमयोश्च व्याप्यत्वविशिष्टव्यापकत्वविशिष्टयोः भेदः संसर्गः। एव
वं च गवाभिन्ना कृष्णा गवाभिन्नसंपन्नक्षीरतमाभिन्नेति बोध इत्याहुः। अन्येतु भेदे प्रतियोगि
तया कृष्णपदार्थक्षीरपदार्थयोर्गोपदार्थस्याधिकरणत्वेनाभेदे च गोपदार्थस्य प्रतियोगितया कृ
ष्णपदार्थस्याधिकरणतयान्वयः। भेदाभेदयोश्च षष्ठ्यर्थत्वं एवं च कृष्णाभिन्ना गोभिन्नसंपन्नक्षीरत
मा गवाभिन्ना कृष्णा संपन्नक्षीरतमेति बोध इत्याहुः। विशेषणपच्यते तु इष्टलड्त्यन्तरतीयार्थः
कृतिः सा च विषयत्वरूपजन्यत्वसंबंधेन पाके सा चाख्याने पदार्थफलेन तच्छेद्यतास्याता

ख्यातार्थे तृत्वं तण्डुले स्वं च चैत्रकृतिविषयपाकजन्यफलाश्रयस्तण्डुल इति बोधः ॥ घटं जानातीत्यत्र घटवि
षयकवर्तमानज्ञानाश्रय इति बोधः चैत्रेण ज्ञायते घट इत्यत्र निरूपितत्वं तृतीयार्थः विषयत्वं प्रत्ययाख्या
तार्थः तेन घटनिष्ठविषयतानिरूपकवर्तमानज्ञानविषय इति बोधः प्राचस्तु ॥ तृतीयार्थो वृत्तित्वं तच्चाख्याताख्या
तार्थे तत्र याकेऽपि प्रकारतयोऽन्वेति आख्यातार्थधात्वर्थप्रकारतापैवभानात् ॥ तथा च चैत्रवृत्तिपाकीयकृ
तिविषयफलवांस्तण्डुल इति बोधः संख्याकालादिविरिक्ताख्यातार्थे तु प्रधानताया इतरानन्वितप्रथ
मान्तपदोपस्थाप्येऽन्वयः तत्रैवाख्यातार्थसंख्यान्वयस्तेन चैत्रेणास्थीयते चैत्राभ्यामास्थीयते चैत्रैः स्थीयत
इत्यत्र संख्यायाश्चान्वयेन साधुत्वार्थस्यैकवचनप्रयोगोऽपि संगच्छते। प्रथमातिक्रमेकारणाभावा
त् ॥ अत्र धात्वर्थस्य विशेष्यत्वादितरानन्वितत्वेन तत्र संख्यायान्वयाय प्रथमान्तपदोपस्थाप्यत्वमुक्तं ॥ वे
दत्वमुत्तरभितत्र चैत्रे संख्यान्वयवारणाये जरानन्वितेत्युक्तं । यत्तु चैत्रस्य तराचयान्निराकांक्षत्वादे
व न तत्र भावनान्वय इत्याहुः ॥ तन्न ॥ नीलघटं जानातीत्यत्र कर्मत्वान्वितेऽपि घटे नीलान्वयवदितर
प्रकारीभूतेऽपि चैत्रे द्विभावनायाः प्रकारतयान्वये निराकांक्षत्वाभावाद्विशेष्यतयैवान्यत्र चैत्रस्यान्व

न्वयेतिराकांक्षत्वमितिदिक्॥ कृञश्चप्रत्ययवाचकत्वं नतुव्यापारस्तेनतदाश्रयमात्रे बीजादौबीजंकरो
तीति नप्रयोगः रथादौचगमनकर्तृत्वप्रयोगो गौरो गौराः॥ ननु कृञोयत्नवाचकत्वेपाकं करोतीत्यत्र
पाककर्मककृतिमान्कृतिमानितिबोधः स्यादितिचेत्॥ न। तत्रोऽस्यात्तस्याश्रयत्वेलक्षणांगीकारस्योभय
संमतत्वात्। चैत्रोग्रामंगतोग्रामइत्यादौ सामानाधिकरण्यानुभवात्कर्तृकर्मणोः क्तइत्येतद्यथा च चै
त्रोगमनकृतिमद्भिन्नोग्रामोगमनफलवद्भिन्न इतिबोधः॥ कृदर्थैकदेशकृतौफले च धात्वर्थ
स्यान्वयः आकांक्षावशान्मैत्रस्य नप्तृत्वादाविव। न च धातूत्तरप्रत्ययत्वेनैव कृतौशक्तिः याचका
दिपदे निरूढलक्षणेतिवाच्यं॥ भावकृतोपि कृतिवाचकतापत्तेः न च चैत्रः पक्तेत्यत्र पाककृतिमा
न् चैत्र इत्येवान्वयबोधात् सामानाधिकरण्यमसिद्धं। न च नामार्थकृतेर्भेदे नान्वयासंभवः अर्थ
वद्धातूत्तरप्रत्ययेतरत्वकृत्सुप्व्याहृतत्वे सैव नामत्वादितिवाच्यं। भोक्तात्रप्रतीत्याहावन्वयप्रसंगात्
भोजनकृतेस्तत्प्राश्रयताभावात्॥ यदि च तत्र कृतिमत्त्वप्रकारकपाककृत्याश्रयः तत्प्रतीतिविरो
धादसंभवः कृतेर्भेदेनोक्तरीत्यान्वये न बाधकं तदा कृतौ शक्तिरनिवार्या लाघवात्। न च मो

त्ता गुणा इति प्रयोगापत्तिः। पचति गुणा इति प्रयोगवदेतस्यापि प्रत्ययोपस्थाप्यकृतेः समवायसंबंधेनैवान्वये
न वारस्यादिति दिक्: प्राभाकरास्तु॥ क्रियानुकूलव्यापारो धात्वर्थः आश्रयत्वमाख्यातार्थः तथा च तंडुल
पचतीत्यत्र तंडुलकर्मकपाकानुकूलव्यापाराश्रय इति बोधः तन्न यत्नानुभवप्रसंगात्। एकदेशान्व
यस्वीकाराच्च। फलं धात्वर्थः व्यापारश्चाख्यातार्थ इति मतं तत्तृतीयार्थः तथा च तंडुल इति फलानु
कूलव्यापारवानिति बोधः एवमन्यत्रापीति मंडनमिश्राः संसर्गाभावो ऽन्योन्याभावश्च नञर्थः तत्रा
न्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलभ्यं तेन नीलघटवति घटो नास्तीति न प्रयोग
न वा लोहघटो न घट इति प्रयोगः न च कंबुग्रीवादिमान्नास्तीत्यत्रान्वयितावच्छेदकगुरुतया प्रति
योगितानवच्छेदकत्वाल्लेव्युत्पत्तिरिति वाच्यं॥ गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वं गौरवा
दिति केचित्। अपरे तु अन्वयितावच्छेदकसमव्याप्यधर्मावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिसिद्धं
कंबुग्रीवादिमान्नास्तीत्यत्र घटत्वं तादृशमतस्तदवच्छिन्नप्रतियोगिताकसंसर्गतया भासत इत्या
हुः तन्न॥ गुरोः सत्त्वान्नास्तीति प्रयोगापत्तेः विशिष्टसत्तात्वस्यापि तावच्छेदकसमनियतत्वेन

६९

न्यः

तदवच्छिन्नप्रतियोगिताकाभावस्य गुरोस्तत्वादिति तत्तुच्छं तित्तद्धर्मव्यापकत्वं तद्धर्मावच्छिन्नसमानाधि
करणात्यंताभावप्रयोगितानवच्छेदकत्वं च विशिष्टसत्तात्वे नास्ति॥ यत्त्वन्वयितावच्छेदकसमनि
यतोयः कश्चिद्धर्मस्तदवच्छिन्नप्रतियोगिताकत्वं वृत्यत्तिसिद्धं अन्यथा कंबुग्रीवादिमत्त्वस्याप्यन्व
यितावच्छेदकसमनियतत्वेन दोषतादवस्थ्यात्। तथा चान्वयितावच्छेदकव्यापको यः कश्चिद्धर्म
स्तदवच्छिन्ना प्रतियोगितासंसर्गलभ्येति ध्येयः॥ न चोपसर्गवन्नञोपि तात्पर्यग्राहकत्वेन तद्यो
तकत्वाद् भूतले न घट इत्यादौ घटापदानां घटात्यंताभावे लक्षणायैव बोधः किमर्थं नञः शक्ति
रिति वाच्यं। भूतलं घट इत्यत्र नामार्थस्यान्योन्याभावस्य भेदे न भूतलादावनन्वयात्॥ अभाव
तिलक्षणायां भूतलविशेष्यकभेदप्रकारकबोधस्यानुभवप्रसंगात्॥ किंच नेदं चैत्रस्येत्यत्र चैत्रस्
ष्ठिभक्तौ लक्षणानंकारेण चैत्रस्वत्वाभावबोधो न स्यात्॥ न च षष्ठीविभक्तौऽपि षष्ठीमत्यार्थो
तरे लक्षणानंगीकारान्न दोष इति वाच्यं प्रतिपदिकस्यापि तत्ताद्विशिष्टेर्थे लक्षणायैव बो राम
धोपपत्तौ कारकादीनामपि शक्त्याभावापत्तेः षष्ठ्यार्थः स्वत्वं न तु स्वामित्वं। तेन नेदं चै

६०

चैवस्येतारैन जास्वामित्वस्यानिरूपकतासंबंधेनाभाववोधनीयस्तस्यहत्तानियामकतयाऽप्रतियो
गितानवच्छेदकत्वेनाभावप्रतियोगितानवच्छेदकत्वेनाभावाप्रतिपत्त्या बोधासंभवो निरस्तः स्वत्व
स्यषष्ठ्यर्थेनाश्रयतासंबंधेनतस्याभाववोधसंभवात्॥ एवंजनकत्वज्ञापकत्वमवधिमत्त्वंचपंच
म्यर्थो नजनकत्वं ज्ञापकत्वमवधित्वंच॥ एवंसप्तम्यर्थेप्याधेयत्वेनत्वाधारत्वमित्यादिद्रष्टव्य
ननुनञः शक्तिवत्प्रजयतीत्यादौ प्रकर्षे जयबोधादुपसर्गेपि शक्तिरभिधेयेति चेत्॥ नाऽउपस
र्गस्यनामत्वेनधात्वर्थभेदेनतदर्थान्वयासंभवाद्धातोरेवलक्षणांगीकारात्। नचधातोः प्रक
र्षेलक्षणायां जयस्यशक्यत्वेनप्रकर्षजयबोधेयुगपद्वृत्तिद्वयविरोधः प्रकर्षेजयेलक्षणा
यातुतस्यशक्यसंबंधरूपलक्षणासंभइतिवाच्यं। अभेदेपिस्वस्मिन्संबंधस्यसत्ताद्भ्युपग
वच्छेदकारूपेणातद्बोधेलक्षणांगाकारात्। यथाऽइष्टमहस्यघटत्वेनबोधेलक्षणेतिदि
क्। ननुवेदप्रामाण्यं पृथक्स्वीकरणीयं तयोःसंव्याद्दिरूपार्थान्वयबोधस्यसत्त्वेनतिद्ध
त्वात्॥ किंयंतोघटाइति एषेदशांगुलीप्रदर्शनेदशत्वस्यघटेज्ञानात्॥ एवंचेशक्ति

२१

राम

विशेषेणाद्यविशेषज्ञानात् मानांतरस्य तदानीमभावात्सिद्धं प्रमाणांतरमिति चेन्न । नानादेशचे
ष्टया तदर्थबोधकशब्दानुमानादेवार्थबोधसंभवान्मानांतरकल्पने गौरवापत्तेः । एवं दिवाभु
ञ्जानत्वे सति पीनत्वादित्यादिहेतुना रात्रिभोजनानुमानसंभवेन नार्थापत्तिरपि मानांतरं
अतएव प्रत्यक्षेणैवाभावग्रहस्योपपादितत्वादनुपलब्धेरपि प्रमाणांतरता निरस्ता । न च संभ
वोऽपि प्रमाणांतरं स्वीकार्यं शतं घटाः संतीति ज्ञानात् दशत्वज्ञानं जायते नैतदनुमानात् संभ
वति । शतसंख्यायां दशत्वसंख्याव्यभिचारित्वादिति वाच्यं ॥ पर्याप्तिरूपसंबंधेन दशत्वसं
ख्याव्यभिचारित्वेऽपि समवायेनाव्यभिचारित्वात् यद्वाऽत्र शतं घटाः संति तत्रैव ते प्रदेश
शो दश शतघटवत्त्वादिप्रकारेणानुमानसंभवात् ॥ ऐतिह्यमप्यविदितकर्तृकः शब्द एव । प्र
माणं चेच्छब्दप्रमाणेऽन्तर्भवेत् नो चेदप्रमाणमेवेति सिद्धं । चत्वार्येव प्रमाणानीति ननु
प्रमात्वे सिद्धे सर्वैरिदं स्यात् । न च तत्प्रत्यक्षेण शक्यग्रहं ज्ञानस्यातीन्द्रियत्वात् । अन्यथा

राम

ज्ञानांतरज्ञानादिधारासाम्नं तु विषयांतरसंचार इति। अत्र प्राभाकराः स्वप्रकाशमेव ज्ञानं
संवेद्यते अहं जानामीत्याकारकमिति मातृमेयविषयकमित्याहुः तन्ना न्यास्वरूपज्ञाने स्व
रूपवद्रूपवत्त्वस्य योग्यत्वात् तस्मात् ज्ञानं संवेद्यते अहं जानामीत्याकारकमिति मातृमेयविषय
यकमित्याहुः। तन्न। चाक्षुषज्ञाने रूपवत्त्वरूपवत्त्वस्य योग्यत्वात् तस्मात् ज्ञानस्य प्र
मसिद्धत्वात् सन्निकृष्टत्वाच्च ज्ञानतायानिरस्तत्वात् अन्यज्ञानानुमानमिति भट्टमतं निरस्त
प्रायं ज्ञानरूपसाध्याप्रसिद्ध्यानुमानासंभवात्। तस्मात् स्वप्रकाशेन ज्ञानतालिंगका
नुमित्यावा प्रमात्वग्रहं संभवति किं तु मनसैवेति न चैवं शाणुकाश्चनवस्याचाव्यु
षादिसमत्वाः मानसेऽप्रति प्रबंधकत्वादिति मुरारिमिश्राः तथा हि। जानामि तु म
यसंमतं तथा च घटज्ञानानंतरं मनः संयुक्तसमवायेन तज्ज्ञानं ज्ञायते तत्र घटत्व
विशिष्टस्य पूर्वमुपस्थितत्वेन भानं निर्विवादं घटत्वतो ज्ञाने संबंधो घटत्वं हि शेष्य

तासान्चानुपस्थितासंबंधविषयाभासते संबंधस्यानुपस्थितस्य भानमुभयसिद्धं । अभावत्त्ववत्प्रकारत्वस्य
भाने तु नैयायिकानामिष्टमेवेति । यद्वा घटत्वसंबंधमर्यादया प्रकारत्वे भानं तत्र था च घटत्ववद्विशेष्य
कत्वे सति घटत्वप्रकारकत्वरूपं प्रामाण्यं मम न सा प्राथमानुव्यवसायेन स्वग्रहं ज्ञानत्वघटितम
पि स्वग्रहं ज्ञानत्वस्यायोग्यत्वेन भानांगीकारादित्याहुः तन्न । वह्निगुंजापुंजयोर्गुंजावह्निरिति भ्रम
कांहत्तं तद्विशेष्यत्वावच्छिन्नं तत्प्रकारकत्वं तत्र ज्ञाने । न चानुपस्थितयोरवच्छेद्यावच्छेदकभावे ग्रह
तुशक्यः प्रथमानुव्यवसायेन पूर्वोक्तरीत्या तद्विशेष्यकत्वतत्प्रकारकत्वयोर्ज्ञानेऽपि द्वितीया
नुव्यवसायेन पूर्वोक्तरीत्या तद्विशेष्यकत्वतत्प्रकारकत्वयोर्ज्ञानेऽपि तृतीयानुव्यवसायेनोपस्थि
तयोस्तयोः संसर्गविधयावच्छेद्यावच्छेदकाभावः शक्यग्रह इति परतस्त्वप्रामाण्याग्रहो न तु स्म
नः तदप्रामाण्यग्राहकयावत् ज्ञानग्राहकग्राह्यत्वस्य तज्ज्ञानविषयकज्ञानाजन्म
ज्ञानग्राह्यत्वस्य वा वक्तव्यत्वादनुव्यवसायाग्राह्यत्वादिरूपस्य स्वतस्त्वस्य संभवादिति द्विया
नुव्यवसायेन गृहीते प्रामाण्ये ज्ञानान्तरेणानुमानादिनापि गृहीते संभवतीति नोपसि

साध्यकानुमानसिद्ध्यर्थं कुत्र स्यादरस्तामितिदिक् मत्वं जातिमत्वं मे तच्चोक्तमेव सामान्य
विशेषसमवायाख्याः पदार्थाश्चोक्ता एवेति सप्तैव पदार्थाः ॥ ॥ एवकारस्य नीलं सरोजं भ
वत्येवेत्यादौ क्रियासंगतस्यायोगव्यवच्छेदः शंखः पांडर एवेत्यादौ विशेषणसंगत
स्यायोगव्यवच्छेदः पार्थ एव धनुर्धर इत्यादौ विशेष्यसंगतस्यान्ययोगव्यवच्छेद इति शेषः नन्वासु वि
त्रसैवाद्यशतामैवसेवेदमिलाघनुरोधे नान्ययोगव्यवच्छेदबोधस्यावश्यकत्वात्तेनैव सर्वत्रोपपत्तौ तायो
गव्यवच्छेदादिबोधः एवकारादिति चेत्तत्र शक्तिः ॥ विस्तरस्तु स्मत्कृत एवकारवादे द्रष्टव्यः अत्र
केचित् सत्तेव पदार्थांतरं तद्धि तत्र द्रव्यादित्रयांतर्गतगुरुणोऽपि वृत्तौ नचतद्धित्तेन मानाभावः
अनुगताधीनिमास्येत्स जातुगतगुणस्य क्रयसाधनत्वप्रतीतास्वत्वाश्रयस्य क्रयसाधने गुरो
पि तद्धित्तत्वसिद्धेः नापिसाम्यादिकं जन्यसत्तिमत्त्वे सति विशिष्टत्वात् । ननु तत्र मानाभाव
तयाहि तत्त्वाश्रयस्य प्रत्यक्षत्वेऽपि तत्र सत्तसंशयभ्रमयोजीयमानत्वेन तस्येंद्रियाग्राह्य

न्या:

वाता। न च प्रतिग्रहादिज्ञानसहकृतेंद्रियग्राह्यत्वस्वत्वजनकज्ञानविशेषस्य प्रतिग्रहपदार्थत्वेनान्योन्या
श्रयापत्तेः न च प्रतिग्रहादिक्रियार्थकसंबंधजनिकाकर्तृकर्मनिरूप्यक्रियात्वात्। गमनक्रिया
वद्दृत्तिक्रियायां ईसप्रागभावानवच्छिन्नत्वप्रतियादिकायां कर्तृनिरूप्यायां कर्मप्रन्यायां कर्मसं
बंधाजनिकायां व्यभिचार इति कर्मपदं घटं जानातीत्यत्र विषयरूपकर्मनिरूप्यां व्यभिचारवारणा
य कर्तृपदं। ज्ञानरूपक्रियानुत्पादकर्तृनिरूप्येति तद्वारणाय विनीतत्वं क्रियाविशेषणं। तेन चेष्टा
यां न व्यभिचारः न च गमनक्रियायाः दृष्टांतत्वासंभवः उत्तरसंयोगावच्छिन्नसंस्कृतस्पत्तदृष्टत्वे च संयो
गस्य हि द्वयोरुभयनिरूप्यत्वेन दृष्टांतत्वसंभावादनुमानात्तत्सिद्धेरिति वाच्यं। ग्रामेत्यजाति
त्यादौ त्यजक्रियायां व्यभिचारादप्रयोजकत्वाच्च॥ एतेन कर्तृकर्मनिष्ठधर्मजनिकाफलावच्छि
न्नत्वेन धातुप्रतिपाद्यत्वादिति परास्तं॥ स्वरूपासिद्धेः॥ स्वत्वसिद्धौ स्वत्वजनकज्ञानस्याधा
तुवाच्यत्वासिद्ध्यासिद्धेः न चार्जितेषु नानाविधेषु स्वमित्यनुगतप्रयोगादनुगतधर्मसिद्धिः स्म

रितिवाच्यं। अस्मादिशब्दप्रयोगेनापि अनुगतधर्मासिद्ध्यापत्तेः॥ अथ प्रतिग्रहानंतरं यथेष्टविनियोगदर्श
नात्तयोः कार्यकारणभावः ननु कालांतरभाविययेष्टविनियोगप्रत्याशुविनाशिनः प्रतिग्रहस्य द्वारं वि
ना कारणत्वेन संभवतीद्वारत्वेन स्वत्वसिद्धिः तच्च प्रतिग्रहदानादिना जन्यते दानादिनान प्रतीतत्वाच्च ध
ननिष्ठं स्वामिनिरूप्यं। नन्विदं ममेति ज्ञानरूपप्रतिग्रहस्य स्वत्वजनकत्वे परकीयद्रव्येपि ममेदमे
दमिति ज्ञानात्स्वत्वापत्तिः॥ नच स्वत्वं प्रति स्वत्वस्य प्रतिबंधकत्वात्परकीयद्रव्ये परस्य स्वत्वान्नान्यस्य
स्वत्वोत्पत्तिरितिवाच्यं॥ देवदत्तस्येदं न मम किं तु यज्ञदत्तस्येति ज्ञानाद्देवदत्तस्वत्वनाशे इदं ममेति यज्ञ
दत्तातिरिक्तज्ञानाद्यज्ञदत्तातिरिक्तस्यापि तत्र स्वत्वोत्पत्त्यापत्तेः। न च देवदत्तस्येदं न मम किं तु यज्ञ
दत्तस्येति ज्ञानं विषयताविशेषेण स्वत्वोत्पादकं तदभावान्न यज्ञदत्तातिरिक्तस्वत्वोत्पत्तिरि
तिवाच्यं॥ देवदत्तस्य स्वत्वाभाववति देवदत्तस्य तादृशज्ञानात्स्वत्वोत्पादापत्तेरिति चेत् न।
स्वत्वं प्रति स्वत्वस्य प्रतिबंधकत्वोत्पत्तिरितिवाच्यं। देवदत्तस्य त्वाकत्वादेव तत्र स्वत्वा

९६

राम नुतत्वेः ज्ञानद्वयस्य तत्तत्कारणत्वात्। नाशकं तु स्वत्वे इदं न ममेति ज्ञानं। चेन्न च परकीयद्रव्येपि
यज्ञदत्तस्य न ममेति ज्ञानात् स्वत्वनिवृत्त्यापत्तेः यज्ञदत्तस्वत्वस्यापि द्रव्यनिष्ठसंबंधविशे
षेणायज्ञदत्तस्य न ममेति ज्ञानात् स्वत्वनिवृत्त्यापत्तेः यज्ञदत्तस्य यज्ञदत्तस्वत्वनाशे तादृशज्ञानहेतु
त्वोचेत्। न। चौर्याद्यनंतरं यथेष्टविनियोगात्तदपिहारत्वेन स्वत्वकल्पनापत्तेः। किंच स्वत्वस्वरूपसत्ता
दृशविनियोगहेतुत्वे ममेदमर्जितमिति ज्ञानाभावेपि तादृशविनियोगापत्तेः तादृशज्ञानसहितस्य तद्धेतु
त्वे लाघवात्तादृशज्ञानस्यैव तद्धेतुत्वमस्तु किं तेन। अपि च यथेष्टविनियोगस्यैव साधनताज्ञाना
धीनत्वेन स्वत्वानपेक्षणाच्च। ननु कथं तर्हि स्वत्वव्यवहारः इति गृहादिविषयत्वेनेति चेत्।
न। विषयत्वस्य विषयस्वरूपतया यादृच्छेपि स्वत्वव्यवहारापत्तेः इतिग्रहरूपत्वे च तन्नाश
काले स्वत्वाभावापत्तेः किंच पितृमरणस्य निर्विषयतया तद्विषयत्वासंभवेन धने पुत्र राम
त्वव्यवहाराभावापत्तेः॥ मरणाकालीन पुत्रज्ञानविषयत्वेन तद्व्यवहार इति चेत्। न। पुत्र

ज्ञातस्वर्णादिविनियोगेनतो दासीन स्वमन्तव्यायोनस्यात् । दानात्फलेचच स्यादितिचेत् । न यादृशोपायव्य
तिरिके विनियोगासंभवस्तादृशोपायसमानकालीना । स्त्रीधनस्य विरुद्धा नातादृशोपायविरोधुपाये
तो भावात् तावद्भावशिष्टशास्त्राविरुद्धतादृशोपायसमयोत्तर इति तद्विशिष्टत्वेनैव स्वत्वव्यवहारस्
भवात् । उपायइयेस्त्रापशास्त्राविरोधित्वविशेषणात्चौर्योपात्तचौर्यनीतयोः स्वत्वतदभावेपि
नरूपेणाविनियोगोपायतातेनरूपेणशास्त्रानिषिद्धत्वं वक्तव्यं । तेन कृष्याब्राह्मणानां निषिद्धयानि
षिद्धप्रतिग्रहेण च ब्राह्मणेनार्जिते न स्वत्वाभावः कृषित्वेन प्रतिग्रहत्वेन च विनियोगोपाये
नषिद्धत्वा ॥ किंतु ब्राह्मणस्य कृषित्वेन तत्प्रतिग्रहत्वेनेति ॥ अन्ये केचित् । उत्तरकाली
नकालीनविनियोगस्य विनियोगेच्छादिकारणसत्वे स्वीये परकीये च दर्शनेन तत्र कथादेर्
किंचित्करकल्पाप्रतीतौ शास्त्राविरुद्धत्वस्यापन्नत्वात् । तस्मात्स्वपदार्थान्तरं प्रमाणं तु तत्र परस्वनाशदी
तेन्यादिशास्त्रं तदा प्रतिग्रहादिनातन्मतेदानादिना न भवति । तद्विकल्पातित्वमरणाद्ध्रुवं वा तु त्वघ
ते पितृमरणेनारस्तु त्वत्रसुतेनापोये स्वत्वे पितृमरणोदेवा । परंतु तदभावविशिष्टभर्तृमरणस्यास्त्री ।

राम:

कारणतावकल्पनात्तथात्वानुत्पादस्समवायेपि मानं। स्वत्वस्यानुपपत्तेः। अन्यथा दासीतत्सुतादिष्वपि यागत्वप्रसंगे यातु
त्पन्नमन्नेनाचतत्स्वत्वत्तमप्राप्तिः। पुत्रस्य तु पितृमरणात्स्वत्वानुपपत्तेः। पक्षागमस्य पुत्रस्य पितृमरणात्स्वत्वाजनकत्वापत्तिः।
एवं प्रतिग्रहादिजन्मसंस्कारस्यानुमतत्वधात्वादौ स्वत्वे तद्दीपस्वत्वानुपपत्तेः। क्रयादिजन्यहीनत्वादिज्ञानस्य
दौ स्वत्वे चेत्तद्ध्वंसपरमाणुस्वत्वेन जानाति तद्वत्तज्ञानेन स्वत्वोत्पादस्तत्स्वत्वेन चेत्तर्हि कारणेनानेनैतत्ध्वंसपरमा
णुजनितहृष्टात्तेपितृस्वत्वापत्तिरिति वाच्यं। परमाणुस्वत्वस्यजन्यस्वत्वेनानाशकागीकारात्। अत एव म
करणादिजन्यसंस्कारवद्गतानि स्वत्वमित्ति परास्तं कीर्तनेतुभिः घटोत्पादेन स्वत्वाभावापत्तेः। न च
वर्णस्वत्वाभावात्। दशभागाधनेनिरूपितदशस्वामित्वस्वीकारापेक्षया निरूपितमेकमेव स्वत्वमि
ति लाघवमिति वाच्यं। तेनैतद्वापि दशस्वामित्वस्वीकारात्। अन्यस्यैकस्य दानेन स्वामित्वनाशे अन्येषा
पि स्वामित्वाभावप्रसंगात्। न च दशभागस्यैकस्य लोपेनैकेना प्रागन्तःस्वत्वनाशे भ्रातरेण तेन स्वत्वाभावा
पत्तेः ज्ञापितानांस्वत्वस्वीकारे दुर्वार इति वाच्यं। चरमभागस्य नाशस्यैव तत्स्वत्वनाशहेतुत्वात्। न च तत्पुत्रस्य
स्वत्वानुत्पत्तिप्रसंगः। तत्स्वत्वप्रतिस्वत्वस्य विरोधित्वात्। समपितातत्त्वे पितृमरणाद्ययातद्युत्पत्तेः। न च ता
नादिरूपोपायस्य समवायेन हेतुत्वे ममानुविवृतपोतिस्वीकी। दशभागरूपतद्धनेन निरूपितमेकमेव वास्तु

यथा दृश निरूपित मेकं धनेरत्वमिति के क्वित॥ प्रमाणायं मे यादि वामवै वंतमोवात शक्तिशा हस्या
दिता तिरिकृत्व निरा साव संप्रेषंप दार्था इति श्रीधारासंग्रहविरचिते लसम देवात्म ज माधवदेव विरचि
तो न्यायसारः समाप्तोयम् श्रीमन्माधवदेवइत्यभिहितो ब्रह्मांड भांडोदरे स्फूर्तिः सूर्यनिभः शर
त्कुमुदिनीबंधुप्रभाधीरमूत्त। तत्र ज्ञाविबुधीकृता खिलजनगच्छी माधवः सूरिराट्कृतं ग्राथ्यैर्जिताखेलंवि
वार्यविरचितो श्रीन्यायसारसुधी॥१ गोदातीरविभूषणं तोपवुयषाः श्रीलक्ष्मणाख्यः सूरोधारास्रोत्तरेस्थितो
खिलजगद्धौर्जुताप्रहीतस्तत्पुत्रिउत्तरारिराजनगरे श्रीन्यायसाराभिधग्रंथं माधवदेव पंडितस्मर्ता
त्वाक

हरोदिं पुस्तकं

Nyaya Saroyam Hari Yajwan

न्यायसारोयंहरियज्वनः

[illegible]

२६